# MEMOIRS

OF THE

# ASIATIC SOCIETY OF BENGAL

VOL. III, No. 8, pp. 449—514.

# CATUḤṢATIKĀ BY ARYA DEVA.

EDITED BY

MAHĀMAHOPĀDHYĀYA HARAPRASĀD SHĀSTRĪ, M.A., F.A.S.B., C.I.E.




CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS, AND PUBLISHED BY
THE ASIATIC SOCIETY, 1, PARK STREET.
1914.

*Price Rs.* 2; *or* 2*s.* 10*d.*

26-10-14.

## PREFACE.

The following fragments of Āryadeva's Catuḥśatikā with their commentary by Candra Kīrti are published from 23 old palm leaves written on in Newari character of the 11th century. I had great difficulty in arranging the leaves, as the old leaf-marks have been obliterated in all the leaves except one. That one leaf is marked 15. The last owner of the manuscript marked the other leaves from 16 to 38, leaf 29th belonging to a work on grammar. He has done his work so badly that his 36th leaf contains the colophon of the first chapter, while the 15th leaf, which has the original leaf-mark, contains that of the third chapter. It was after a careful comparison with the Tibetan translation in collaboration with my esteemed friend Dr. Satīśa Candra Vidyābhūṣaṇa that I could put the leaves in their proper order.

A comparison with the Tibetan translation revealed the fact that the original Catuḥśatikā contained three hundred and seventy-five verses in the Anuṣṭup metre, which with sixteen long colophons, would count to a copyist, 400 Ślokas. Hence the name Catuḥśatikā. These three hundred and seventy-five verses are divided into sixteen chapters, the majority of which contain 25 verses each. In a few only the number of the verses is less than 25.

From a comparison with the Tibetan translation the commentary appears to have been written by Candra Kīrti. The commentary is written in beautiful prose, enlivened in the first 8 chapters with pretty stories and anecdotes taken both from life and literature; and in the last 8 chapters, with philosophical speculations both Buddhistic and Brahmanical. The only author quoted by name in these fragments of the commentary is Buddha pālita, whom the commenator calls Ācārya. Candra Kīrti is well known by his commentary on the Mādhyamaka Kārikās of Nāgārjuna, and also by his work entitled Madyamakāvatāra which is known in Tibetan version only.

The author Āryadeva is said to have been a pupil of Nāgārjuna, and as such, must have flourished about the end of 2nd century A.D. One of his treatises in Sanskrit entitled Cāritra-viśuddhi-prakaraṇa was discovered by me in 1897 at Kaṭmaṇḍu, and published in the Asiatic Society's Journal for that year; and Catuḥśatikā is a discovery of another work in Sanskrit by Āryadeva. The work is often quoted under the name of Śataka in Candrakīrti's commentary on the Mādhyamaka Kārikās of Nāgārjuna. For instance, in Bibl. Budh. Edition of the same work, p. 71, we read:—

यथोक्तं शतके :— सर्व्व एव घटो दृष्टो रूपे दृष्टे हि जायते ।
ब्रूयात् कस्तत्त्वविन्नाम घटः प्रत्यक्ष इत्यपि ॥
एतेनैव विचारेण सुगन्धि मधुरं मृदु ।
प्रतिषेधयितव्यानि सर्व्वान्युत्तमबुद्धिना ॥ Ch. XIII. 1. 2.

These verses are not to be found in these fragments. But there is another quotation in page 173 of the same :—

यथोक्तं शतके । अलातचक्रनिर्म्माणस्वप्नमायाम्बुचन्द्रकैः ।
धूमिकान्तःप्रतिश्रुत्का मरीच्यभ्रैः समो भवः ॥

In a note the editor, M. Louis de la Vallee Poussin, says that this is the 25th verse of the 13th chapter. This agrees with the last verse of the 13th chapter of our fragments.

There is another quotation in page 199 :—

यथोक्तमार्य्यदेवेन । यस्तवात्मा ममानात्मा तेनात्मा नियमान्न सः ।
नन्वनित्येषु भावेषु कल्पना नाम जायते ॥

The editor in a note says this is from Sataka X. 3. This agrees with the 3rd verse of the 10th chapter in our fragments.

Another quotation is in page 220 :—

यथोक्तमार्य्यदेवपादैः । यथा बीजस्य दृष्टोऽन्तो नचादिस्तस्य विद्यते ।
तथा कारणवैकल्यात् जन्मनोऽपि न सम्भवः ॥

The editor says this is from Sataka VIII. 25. This is the last verse of the 8th chapter in our fragments.

The fact that Catuḥsatikā is called Sataka both by Candra Kīrti and M. Poussin led me to think that the Sata Sāstras registered by Nanjio under the name of Āryadeva may perhaps be the same work as Catuḥsatikā. Acting under this impression I obtained from my friend Professor Takakusu of Tokio, a copy of the Sata Sāstra with the commentary of Vasubandhu or Vasu. My young friend and pupil Dr. Kimora read the work for me and pronounced it to be a different work. He says it has 20 chapters of five Sūtras each, making a total of a hundred sūtras, but that ten chapters, being of no use to China, were not translated into their language. Dr. Kimora's description of the work does not tally with that of Nanjio, who says that it has eight chapters only. There is another work entitled Satasūttra by Āryadeva registered by Nanjio. But it is only the Vaipulya version of the former.

The following table will show the distribution of verses in the various chapters of the Catuḥsatikā and their number in each in the fragments published :—

| Chapter. | Total number of verses in each chapter. | Number of verses. | Number of verses in the fragments. | | |
|---|---|---|---|---|---|
| I. | 25. | 1 to 25. | 19, 21, 22, 25 | = | 4. |
| II. | 25. | 26 to 50. | 32 to 37 | = | 6. |
| III. | 25. | 51 to 75. | 73 to 75 | = | 3. |
| IV. | 25. | 76 to 100. | 76, 77, 89 to92, 98 to 100 | = | 9. |
| V. | 25. | 101 to 125. | 101 | = | 1. |
| VI. | 25. | 126 to 150. | 0 | = | 0. |
| VII. | 23. | 151 to 173. | 159 to 169 | = | 11. |
| VIII. | 24. | 174 to 197. | 175 to 186 192 to 197 | = | 18. |
| IX. | 25. | 198 to 222. | 198 to 204, 222 | = | 8. |
| X. | 25. | 223 to 247. | 223 to 226, 233 to 238 | = | 10. |
| XI. | 14. | 248 to 261. | 253 to 259 | = | 7. |

| Chapter. | Total number of verses in each chapter. | Number of verses. | Number of verses in the fragments. | | |
|---|---|---|---|---|---|
| XII. | 14. | 262 to 275. | 265 to 272 | = | 8. |
| XIII. | 25. | 276 to 300. | 288 to 300 | = | 13. |
| XIV. | 25. | 301 to 325. | 301 to 21 | = | 21. |
| XV. | 25. | 326 to 350. | 343 to 50. | = | 8. |
| XVI. | 25. | 351 to 375. | 351, 352. | = | 2. |
| | | | | | 129. |

Mañjunātha and Thwanimmathappa, the joint Indian and Tibetan translators of the text of Catuḥśatikā, say that this work was composed in the Sinhalese country on the other side of the great sea. It also says that the country of the composition of the work is now, at the time of the translation, under the possession of the Mussalmans. Nanjio says that Ārya Deva was a native of South India (not Ceylon as in Eitel) and a disciple of Nāgārjuna. There is a life of Ārya Deva in five leaves translated by Kumārajīva into Chinese between A.D. 401 and 409. Āryadeva is also called Nīlanettra, on account of his having two spots, as large as the eyes, on the cheeks. It is also said by Nanjio that his real name was Candra Kīrti. I think that the later writers confounded the author with the commentator.

Chandra Kīrti, the commentator, was an opponent of Candragomi, who lived between 630–940, viz., during Yuan Chauang's stay in Eastern India. He quotes in his commentary on Mādhyamakakārikā from Tathāgataguhyaka, one of the 9 dharma of the Nepalese and a work of the Tantrika Sahajia sect. His commentary was translated into Tibetan by the Indian Paṇḍit Bamse Raṭna-vajra and Lama Thwanimmathappa. Like the text the commentary has no Chinese translation.

*Catuḥśatikā by Ārya Deva.*

*Edited by* Mahāmahopādhyāya Haraprasād Shāstrī, M.A., F.A.S.B., C.I.E.

# चतुःशतिका by आर्य्यदेव ।

..... सहचारिणौ ॥ 19.

यस्य हि भवतोऽन्यस्य वा दृष्टैर्योगः प्रियस्तस्य तैरेव वियोगः कथमप्रियः। ननु यत्रैव सन्तामे योगस्तत्रैवावश्यम्भावी वियोगोऽपीति योगवियोगौ चोभावपि दृश्येते सहचारिणौ। तस्माद्योगार्थिना वियोग + + +

[२] राधनं कृतं। श्रीर्मस्यादिति तेन वरो लब्धो यथास्य गृहं प्रविष्टस्य श्रीर्गृहं प्रविष्टा तदनुलग्ना च कालकर्णी, स श्रियं पृच्छति स्म, कैषा, आह कालकर्णीति। स आह। न पुनर्मयास्यार्थे वरो लब्धः। सा प्राह। यत्राहं तत्रैषा अवश्यमिति। एवं यत्र संयोगः + + + + +

[३] खं एवं सर्व्वसंयोगसुखं वियोगदुःखानुषक्तमेवं यस्य वड़िशामिषभक्षणमिष्टं तस्यावश्यं वड़िशवेधोद्धरणमपीति। अत्राह, यद्यप्यन्ते वियोगो नियतस्तथाप्यादौ संप्रयोगमहत्वात् नासौ गण्यत इति॥ अतिक्रान्तस्य नास्त्यादिरन्तो नागतस्य वा केन ते + + + + +

[४] प्रयोगप्रभावितः। अनागतस्याप्यविद्यावत एवान्ताभावेऽसावपि अप्राप्तत्वात् तदात्मकः। तदत्रानवराग्रजातिसंसारमहार्णवपतितस्य प्रतिक्षणं विनश्वरत्वात्। संसार + + + र्थेन यः संयोगः स क्षणिकः। तदेवमतीतानागतसंगृहीतो विप्रयो + + + + +

[५] स्यातिसूक्ष्मत्वात् संयोगदर्शने सति वियोगदर्शिना सदैव संवेगवता भाव्यं। अन्यभार्य्यापहरणविवादवत्। कश्चित् पुरुषो देशान्तरं गतस्तस्य प्रोषितस्य भार्य्याऽन्येन + + + + + + + ससमीपस्थेन श्रुतं श्रुत्वा च विटगृहं गत्वा तत्कालकृतेन + + + +

[६] तात्कालिकवियोगेन तत्त्वं शोधितं। अत्राह। यद्यपि महान् वियोगस्तथापि ऋतुसम्पदाक्षिप्तचित्तत्वात् नासौ चिन्त्यत इति। उच्यते

शत्रुवत् यान्ति ते काला नियमेन क्षणादयः।
सर्व्वथा तेन ते रागः शत्रुभूतेषु तेषु मा ॥ 21.

इह खलु यस्मात् तव जीवितं क्षणल + + + +

---

[Leaf 36 in the MS. but the earliest leaf according to context. This leaf has lost nearly a third of its length.]

[७] मद्यारिषु तेषु कालेषु भवतो रागो मा भवत्विति। मित्रमुखेनावस्थितारि(मि)परिज्ञाह्वत् तत्परिज्ञानकुशलेन भवितव्यमप्रमादचारिणा। इक्षुदासीदुःखानुबन्धनवत्। यथा इक्षुदास्याः च + + + + परिभवदोषाश्च ख्वा + + + +

[८] शिरमभिलषति। एवमितरेणे+। [नचास्य] कुतश्चित् सुखमस्ति। तदेवमेनां संस्कारधर्मता-मभितः स्थितामपि चानुचिन्तयता संविग्नमानसेन युक्तमनुरूपमाचरितुम्। किं पुनः + + + + + [२६क]

ते ।

विप्रयोगभयाद्गेहान्न निर्गच्छसि [दुर्मते] ।
[विविच्य] नाम कर्त्तव्यं कुर्य्याद्दण्डेन को बुधः ॥ 22.

इह बन्धुजनविप्रयोगः कष्ट इति तद्भयात् गेहान्न निर्गच्छसि दुर्मते । तदपि यदा तदा च मृत्युवशात् नियम + + +

[२] देयं करं कृत्स्नमहत् दुःखमनुभूय पश्चाद्ददति ग्रामीणा, नान्यथा, एवमवश्यत्यक्तव्यं बन्धुजनं मृत्युना त्याज्यंतेऽबुधा नात्मना त्यजन्ति । अत्राह यद्यवश्यं बन्धुवर्गस्त्याज्यस्तथापि सुतमुत्पाद्य [पूर्व] + + + दाहे तस्माद्गृहभारमुत्सृज्येत वा तथता] परिसमाप्तं कृत्वा निर्गमि + + + +

[३] व मया वनं गन्तव्यं किन्तु कर्त्तव्यशेषं किञ्चिदस्ति तत्कृत्वा यास्यामीति तदेतत् यत् क्रियते. यदर्थं च क्रियते तदुभयं कृत्वापि यदि पुनः परित्याज्यमेव तेन तर्हि कृतेन को गुण इत्यकर्त्तव्यमेवैतत् । तस्मान्न तदपेक्षया कालक्षेपो युक्त इति ।

कृत्याकृत्यविचार + + +

[४] ति तमाम्रफलं गृहीतं सोऽन्येन पृष्टः किमनेन करिष्यसीति । स आह । प्रक्षाल्य परित्यक्ष्यामीति । एवं यदि विषयाः परित्याज्याः किं तैः पर्य्यन्विष्टैः यथाहि कश्चित् सार्थिको गमन + + पाषाणं निर्घर्षयितुमारब्धः स पृष्टः किं करोषीति तदेव निदर्शयति स्म + + + +

[५] ज्ञेयानि । यद्यप्यर्थतो वनगमनं प्रधानं तथाप्यात्मात्मीयसंगवतोऽस्माद्भयमुत्पद्यत इति । उच्यते ।

नियमाद्म्रियते यस्य मर्त्त्योऽहमिति भावना ।
तस्य सङ्गपरित्यागात् मृत्योरपि [भयं कु] तः ॥ 24.

इह यस्य कस्यचित् प्राज्ञस्यागमानुसारेण मरणधर्म्माहमिति भावना नि + + +

[६] तावद्भयं नास्ति । कुत एव वनगमनात् पुत्रवियोगात् वा भयं भविष्यतीति । अतो मरणानुस्मृतिभावनायामेव योगः करणीयः । निर्विषीकरणाङ्गुलीयकरबन्धनवत् । सविषान्नपरित्यागवच्च । यथाहि निर्विषीकरणाङ्गुलीयकं करे बध्यते । तथा विद्वद्भिः क्लेशा + + + +

[७] शेन निःश्रेयसमिति ।

## आचार्य्यार्य्यदेवीये बोधिसत्त्वयोगाचारे चतुःशतके नित्यविपर्य्यासप्रहाणोपाय-सन्दर्शनं प्रथमं प्रकरणं समाप्तम् ॥ १ ॥

उक्तस्तावत् प्रथमेन प्रकरणेनानित्यनित्यमिति विपर्य्यासस्य प्रहाणोपायः । + + + + +

[८] सति शरीरे अध्यात्मसमुत्थानि चतुरुत्तराणि चत्वारि व्याधिशतान्युत्पद्यन्ते धातुवैषम्य निमित्तानि बाह्यजानि च लोष्टदण्डशस्त्रशीतोष्णदंशमशकशरीसृपादिसंस्पर्शनिमित्तानि । तस्मादनेक दुःखोदयहेतु + + + + + [३६]

तथा दुःखस्य पात्रं भवति । अपि वा सुखेन भावयितुमशक्यत्वात् तद्विपरीत + + + + + + गम्यते तथाहि ॥

शरीरं सुचिरेणापि सुखस्य स्वं न जायते ।
परेणाभिभवो नाम, स्वभावस्य न युज्यते ॥ 32.

सुचिरेणापि कालेन तैस्तैः सुखोपभोगनिमित्तै र्विषयैरुपचर्य्यमाणमपि सुखस्य स्वं शरीरं न जायते दुःखस्वभावत्वात् । यथा नाम कठिनस्वभावानां त्रपुसीसरजतसुवर्णादीनां यद्यप्यग्निसंयोगाद्द्रवत्वं भवति । तथापि तेषां द्रवत्वं स्वं नैव भवति, कठिनस्वभा[२]वत्वात् । तथा शरीरस्य दुःखस्वभावत्वात् । अनात्मीयेन सुखेन सुचिरेणापि न शक्यमात्मीयत्वं कर्त्तुमिति दुःखमेव शरीरम् ॥ कोकिलपोतवत्, यथा कोकिलपोतः काकेन सम्वर्द्धितः कोकिलस्यैव भवति न काकस्यैवं न सुखस्य शरीरम् । भवति चात्र ।

दुःखात्मकं शरीरं, सुखस्य किं स्वीकरोषि मोहान्ध ।
नहि जातु कृष्णलोहं सुचिरादपि हेमतां यातीति ॥

स्यादेतत्, सदपि दुःखं नासंविदितमनर्थायतनम् । तथाह्येके जात्या प्रभृत्यामरणा[३]न्ता एकान्तसुखिनो दृश्यन्ते । अशसत्त्वाश्च महति पदे निवेशितास्यास्तद्धासङ्गान्न सम्वेदयन्ते । तत्कथं दुःखात्मकं शरीरमिति । उच्यते ॥

अग्र्याणां मानसं दुःखमितरेषां शरीरजम् ।
दुःखद्वयेन लोकोयमहन्यहनि हन्यते ॥ 33.

द्विविधं खलु दुःखं शारीरं मानसञ्च । तत्र य एते सर्व्वसुखोपकरणसम्पन्नाः अग्र्याः अग्रकुलीना महाभोगास्तेषां स्थूलेच्छानां महतः पदस्याभीप्सितस्य दुरापत्वात् ईर्ष्याबाहुल्येनेष्टलो [४] भजं मानसं दुःखमनपायि तेषां । ये पुनरेव नीचकुलीना अशन-शयन-शरण-वसनविप्रहीणा अधमसत्त्वास्ते शारीरेण दुःखेन हता एवेति कुतः कस्यचित् सुखावकाश इत्येवम् सर्व्व एवायं लोको दुःखद्वयेनाहन्यहनि हन्यते । तस्मादत्र न कश्चित् स्वभावेन सुखी विद्यते ॥ अधिकृतहस्त्यारोपितदर्शनमन्युपरितोषणवत् ॥ केनचिद्राज्ञा हस्तिनि दुर्द्दान्ते कश्चिदारोपितो वाहयेति । तेन च स हस्ती सम्यक् प्रेरि[५]तस्ततो राज्ञा परितुष्टेन सम्मानितः । तस्य पुरुषस्य सम्मानं दृष्ट्वा हस्त्यधिकृतः पुरुषः दुःखी सम्वृत्तः । ततोऽस्य भयाद्दौर्म्मनस्यमुत्पन्नम् । द्वितीयश्च हीनपुरुषस्तेन राज्ञा तस्मिन् हस्तिन्यारोपितो वाहयेति । तेन न शकितः । स राज्ञा शारीरेण दुःखेन योजितः । अधिकृतस्य च परितोष उत्पन्नः । तत्रैकस्य मानसं दुःखमभूत् द्वितीयस्य शारीरं । तद्वत् महतामवमानान्मानसं दुःखमुत्पद्यते हीनाना[६]न्तु ताड़नाच्छारीरम् । भवति चात्र । दुःखद्वयेन लोकं विहन्यमानं स्वभावदुःखार्त्तं दृष्ट्वा कस्तं ब्रूयात् सुखीति करुणात्मकः पुरुष इति । अत्राह । यद्यपि दुःखद्वयं विद्यते । तथापि तन्महता सुखेनाभिभूतं न ज्ञायते इति । उच्यते । कुतः सुखस्य महत्त्वं दुःखविधेयस्य कल्पनाख्यस्यापि धर्म्मस्य प्रतिबद्धवृत्तित्वात् । तथाहि ॥

[This is the 32nd leaf in the MS. but it should come here in the work.]

कल्पनायाः सुखं वश्यं वश्याद्दुःखस्य कल्पना ।
अतोऽस्ति किञ्चित् सर्व्वत्र न दुःखाद्ब[७]लवत्तरम् ॥ 34.

यदा खल्वयं पुरुष एवं कल्पयते दाताहमीश्वरोहमिष्टानिन्द्रियार्थानुपभुञ्जेऽहमिति । तदास्यैवं परिकल्पयतो मानसं सुखमुत्पद्यते । सुखसमर्पिणामपि परतस्तदपायमाशङ्कमानानां भोगविच्छित्ति-कल्पनया पुनस्तन्मानसं दुःखं निवर्त्तत इत्येवं सुखस्योत्पादनिरोधयोः कल्पनाविधेयत्वात् कल्पनायाः सुखं वश्यं भवति । दुःखन्तु नैवम् । नह्यस्ति काचित् कल्पना या दुःखस्योपघातासामर्थ्य[८]मुपरुन्ध्या-दित्यतः सुखवन्न दुःखं कल्पनावश्यम् ॥ यत्तु खल्विदं दृष्टविषयसंभोगसुखं या च सुखोदयानुकूला कल्पना, तदुभयमपि दुःखमुपजातमुपहन्ति । तथाह्यौन्द्रियार्थमुपभुञ्जानोप्ययमन्यतमेन दुःखेनाभिभूतः सह कल्पनया तत्सर्व्वं सुखमपहाय दुःखमेव प्रतिसम्विन्ते न सुखं ॥ तदेवं सुखकल्पनाया दुःखविधेयत्वात् दुःखमेव बलवत्तरं न सुखम् । सपत्नीपुत्रसत्कारदुःखितावत् । सप[१२क]त्नीद्वयस्यैका मृतपुत्रा द्वितीया सपुत्रा । तत्र या मृतपुत्रा सा तं सपत्नीपुत्रं सत्क्रियमाणं दृष्ट्वातीव शोचति स्म । सा पृष्टा कस्मात् मृतमभीक्ष्णं शोचसीति । सा प्राह नाहं तं शोचामि अपि तु एतमहं सपत्नीपुत्रो जीवतीति । सा परेण समयेन सपत्नीपुत्रे ग्लाने ग्रामान्तरं गता । कतिपयैरहोभिस्तं ग्रामं उपश्लिष्टा ; मृतकश्च तस्मात् निर्ह्रियते । तदैवं कल्पितम् । स एव सपत्नीपुत्रो मृत इति । एतच्चास्याः परिकल्प्यातीव सौमनस्यं जातम् । वृश्चिकेन चा[२]ङ्गावयवे दष्टा । तदस्याः कल्पनावशेन सौमनस्यं जातं विषदुःखेनाभिभूतम् । अतो न दुःखाद्बलवत्तरं किञ्चित् क्वचिदस्ति । आह चात्र ।

विपर्य्यासाद्यतो जातम् सुखं तस्मात् सुदुर्लभम् ।
दुःखन्तु भूतनिर्य्यातन्तस्मात्तद्बलवत्तरम् ॥

अत्राह । यद्यपि सुखं दुर्लभम् तथापि शरीरस्यापीड़ाकरत्वात् तदात्मीयम्, बह्वपि दुःखं पीड़ाकरत्वात् परमेव भवति इति । उच्यते ।

कालो यथा यथा याति दुःखवृद्धिस्तथा तथा ।
तस्मात् कडेवरस्यास्य परवद्दृ[३]श्यते सुखम् ॥ 35.

यस्य खलु शरीरकालो यथा यथा वर्द्धते बाल-कौमार-यौवन-स्थाविरेषु तथा तथा दुःखस्या-तिवृद्धिर्दृष्टा न सुखस्य । यस्माच्चैवम् विवर्द्धमानस्य शरीरस्य पृष्ठतः पृष्ठतः सुखमपसर्पति, तस्मादस्य शरीरस्य दुःखमेवात्मीयं दृश्यते सुखन्तु परभूतमिति । दीर्घाध्वगवत् । यथा दीर्घाध्वगस्य दिने दिने तीव्रतरं श्रमदुःखं पथ्यदनपरिचयदुःखं च भवति एवं सर्व्वकालं पृथक्जना यथा[४]यथा चिरं जीवन्ति तथा तथा जरादुःखमनुप्राप्नुवन्ति मरणस्य चाभ्यासीभवन्ति । आह चात्र ।

स्नेहादिवास्य दुःखं पुरतः पुरतः प्रयाति यन्नित्यम् ।
त्यजति च सुखं शरीरं परवत् तस्मात्परं भवति ॥

अत्राह । यद्यप्यस्य शरीरस्य दुःखं स्वभावः तथापि सुखहेतुप्रतीकारो यस्माद्विद्यते तस्मान्नात्म-शरीरादुद्वेगः कार्य्य इति ॥ उच्यते ।

व्याधयोऽन्ये च दृश्यन्ते यावन्तो दुःखहेतवः। [५]
तावन्तो न तु दृश्यन्ते नराणां सुखहेतवः ॥ 36.

इह शरीरस्य दुःखहेतवो यावन्तो दृश्यन्ते. अध्यात्मसमुत्थिता धातुवैषम्यहेतुका व्याधयः अन्ये च बाह्याः शीतादिनिमित्ता अनिष्टसंस्पर्शाः। तावन्तोऽध्यात्मबाह्यहेतुकाः सुखहेतवो अस्य शरीरस्य नैव दृश्यन्ते। यस्य चाल्पाः सुखहेतवोऽनेके च दुःखहेतवः शरीरस्य तस्मात् सुखहेतुसद्भावात् दुःखान्नोद्वेगः करणीय[६] इति। तत्र। राजदुहितृ-स्वयंवरप्रार्थनावत्। वैश्रवणदुहितृहरणमान्धातृवत् च। ये राजदुहितरं स्वयंवरां प्रार्थयन्ते ते दुःखेन संयुज्यन्ते। एकस्यैव हि सा सुखहेतु र्भवति न सर्व्वेषाम्। बहवश्च प्रार्थयन्ते न चासादयन्ति ततो दुःखिनो भवन्ति। तथा सत्त्वानां बहवो दुःखहेतवोऽल्पास्तु सुखहेतवः। तथा वैश्रवण-दुहितृहरणे मान्धातृवत् अनेकदुःखहेतवो भवन्त्युभयो[७]र्बलवत्त्वात् न तु तथा सुखहेतवः। आह चात्र ॥

सुखमुदबिन्दुप्रतिमं दुःखन्तु समुद्रवारिसङ्काशम्।
काये मत्वा विद्वांस्तत्र सुखं मन्यते नु कथम् ॥

अत्राह। यदि सुखं नाम न स्यात् नास्य वृद्धिर्दृश्येत। यस्माच्च सुखस्य दृश्यते वृद्धिस्तस्मात् सुखमस्तीति। उच्यते।

सुखस्य वर्द्धमानस्य यथा दृष्टो विपर्य्ययः।
दुःखस्य वर्द्धमानस्य तथा नास्ति विपर्य्ययः ॥ 37

सुखस्य हि यथा यथा वृद्धिर्भवति। तथा तथा तस्य वर्द्ध[८]मानस्य विपर्य्ययो दृष्टः। यदि च स्वभावेन सुखं स्यात् न त + + + + + + + ष्टः स्यात् सुखस्य तु वर्द्धमानस्य तथा विपर्य्ययोऽस्ति न दुःखस्य। तथाहि ॥ सुखमभिवर्द्धमानं कालप्रकर्षेणावशीतं अल्परसमाजायते। दुःखं पुनरभिवर्द्धमान-मधिक[त]रसन्तापककर्कशं सुतरां शरीरं चेतश्चोपहन्ति। तदेवं वृद्धौ विपर्य्ययाभावात् दुःखस्वभावं शरीरं न सुख[ं] स्वभावतोऽस्ति। मान्धातृपतनव[त्] [१२]

[1]कस्यचिद्राज्ञो नैमित्तिकेनावेदितं वर्षं पतिष्यति यस्तेनाम्भसा कृत्यं करिष्यति स उन्मादं गमिष्यतीति। अथ राजा स्वार्थं कूपश्छादितस्तच्च वर्षं पतितं तत्स(स्व ?)जनस्तेनाम्भसा कृत्यं कृत्वोन्मत्तोऽपि सन्नेकप्रकृतित्वात् आत्मानमेवं स्वस्थं मन्यते राजानमुन्मत्तं। ततो राज्ञा तदर्थमुपलभ्य तदेवाम्भ उपयुक्तं मा मामुन्मत्त इति परिकल्प्यावहसेयुर्विनाशयेयुर्व्वा इति। एवं यद्येक एव सूची स्यात् स कुष्ठीव वर्ज्येत यदा तु सर्व्व एव सूचिणस्तदा कुचै[२]षामशुचिसंज्ञा भविष्यति। क्वचिच्च देशे सर्व्वो जनो गलगण्डाभिभूतः परमविरूपः तत्र चान्यो दर्शनीयो गतः स तैः परिवर्ज्यते परमविरूपोऽङ्गविकल इति। आह चात्र।

यदि निर्द्दोषः स्याल्लोकः सर्व्वोऽपि तत्र रज्येत।
दोषस्तु विद्यते यस्मात्तस्मात् सन्तस्तमुज्झन्ति॥

अत्राह। यो नाम युवा भूत्वा सर्व्वोपकरणसम्पन्नं युवतिजनं तुष्ट्या नोपभुंक्ते स जीवलोके परमवञ्चितो भवति। तथा हि सुरभिगन्धामोद[३]सम्वासादस्य तदशौचमपनुद्यते। तत्र शुचिं सेवमानानामदोष इति। उच्यते।

प्रतिनासिकया तुष्टिः स्याद्धीनाङ्गस्य कस्यचित्।
रागोऽशुचिप्रतीकारे पुष्पादाविष्यते तथा॥ 73.

यथा कश्चिदपनीतनासिको वहन् कृत्रिमां नासिकां सकलाङ्गमात्मानं मन्यते तुष्टिञ्च गच्छति। स हि बालजातीयतया यथैव स्वकायप्रतिनासिकया लज्जितव्यं तथैव तुष्टिं जनयति। तथै[४]व कामेषु प्रकृत्या लोलजातीयस्य बालजनस्य मोहादशुचिप्रतीकारेषु सुरभिकुसुमगन्धालङ्कारादिष्वशरीरस्वभावेष्वप्यतः सरागो भवति। प्रतिविधानेन शुचिमात्मानं परञ्च मन्यते। न हि कुसुमादयः समुद्वहन्तोऽपि स्थायिनं गन्धातिशयमलमेनं लशुनमिव वासयितुम्। घृतलिप्तविड़ालनासिकास्वादनवत्। सुवर्णनासिकादर्शनतुष्टिवच्च। यथा विड़ालस्य घृतेन नासिकां म्र[५]क्षयित्वा रुक्षान्नपिण्डो दीयते, स तां स्नेहयुक्तामन्यते। यथा च नासिकावियुक्तः प्रतिनासिकां सौवर्णीं कारयित्वा तां दृष्ट्वा तुष्टिमुत्पादयति। एवं पुष्पादिभिरशुचिप्रतीकारं कृत्वा काये रागमुत्पादयन्ति। आह चात्र।

व्रणोऽयमस्य कायस्य गन्धमाल्यांशुकादिषु।
व्रणलेपनभूतेषु मोहात् संरज्यते जनः॥

अत्राह [६] अस्ति रागस्य कारणं पुष्पादयो, यदि च न स्यात् कारणं, न तैः कायेषु जनो रज्येतेति। उच्यते।

शुचि नाम न तद्युक्तं वैराग्यं यत्र जायते।
न च सोऽस्ति कश्चिद्भावो नियमाद्रागकारणम्॥ 74.

स्वभावेन खलु शुचि नाम वस्तु न किञ्चिदस्ति। तत्र तावद् यदनुपहतदर्शनाः प्रचरितामेध्यबीजदर्शनं कायमीक्षमाणा विरज्यन्ते। तस्मात्तद्वैराग्यकारणत्वात् पुरीषपुञ्जवत् शरीरं शुचित्वेनानुपपन्नं

[1] [Leaf 15 of the MS.]

पुष्पादयोपि नि[७]यमाद्रागकारणत्वेनानुपपन्नास्तत्रापि वैराग्यस्य सद्भावात्। तथाहि कामवैराग्यलाभिनां तेष्वपि वैराग्यमुपजायते। अपि खलु स्वभावेन न हि किञ्चिन्नामास्ति यन्नियमेन रागकारणं स्यात्, तथाहि पुष्पादीनामपि शुचिसंज्ञितानां पर्य्युषितानामन्यथाभावात् प्रातिकूल्यमुत्पद्यते। यदि तेषां स्वभावेन शुचित्वं स्यात् नान्यथाभावः स्यात्। तस्मान्न तेषु स्वभावेन शुचित्वमस्ति। यदि च नियमात् पुष्पादयो भा[८]वा रागस्य कारणं स्युस्तत्र सर्व्वेऽपि सर्व्वदापि रागं जनयेयुर्न चैतदेवमिति। न पुष्पादयो रागस्य कारणं युज्यन्ते। एकस्येष्टानिष्टदुहितृदर्शनवत्। कश्चिद् वणिगभिजातायां दुहितरि प्रवासं गतः स कालान्तरेणागतः। सा चास्य दुहिता प्राप्तयौवना तस्याधिष्ठानस्य वहिरुद्याने कन्याभिः सह क्रीड़ति स्म। तस्य तां दृष्ट्वा तीव्रो राग उत्पन्नो यदा तु श्रुतं दुहिता तवैषेति तदा विरक्तः [१५क] एवं न स कश्चिद्भावोस्ति यो नियमेन रागाय भवति। यत्र च वैराग्यमुत्पद्यते तदशुचिरवगन्तव्यम्। आह चात्र

तत्रैव रज्यते यस्मात् तत्रैव च विरज्यति।
तस्मान्नियमतः सिद्धं न रागस्यास्ति कारणम्।

तदेवमशुचि शरीरं यथा दुःखमनित्यं च तद्विहितं पूर्व्वं प्रतिपादयिष्यति अनात्मत्वं, त एते चत्वारो विपर्य्यासाः इदं न चिन्त्यते किमेते चत्वारो विपर्य्यासाः एकस्मिन् पदार्थे सम्भवन्त्याहोस्वित् नेति। उच्यते।

अनित्यमशुभं दुःखम[१]नात्मेति चतुष्टयम्।
एकस्मिन्नेव सर्व्वाणि सम्भवन्ति समासतः॥ 75.

यत् खलु संस्कृतं प्रतीत्यसमुत्पन्नं तदनित्यं क्षणिकत्वात्। यच्चानित्यं तदशुभमुद्वेगकरत्वात्। यच्चाशुभं तद्दुःखं पीड़ाकरत्वात्। दुःखञ्च यत्तदनात्मकमस्वतन्त्रत्वात् तदेवमेकस्मिन्नेव स्वभावे समासतः चत्वारो विपर्य्यासाः सम्भवन्ति। न चैतत् संविद्यमानमपि वालैर्विपर्य्यस्तैः परिच्छिद्यते। परिकल्प्यते तु तद्विपरीतत्वं भावानाम्। तदर्ह[२]ति प्राज्ञः यथास्थितमनित्यत्वादिकं भावानामधीत्य नैःस्वाभाव्याधिगमे चेतः समुत्साहयितुम्। पिशाचीस्वभावदर्शनभीतवत्। कस्यचित् पिशाची पत्नीरूपेण व्यवस्थिता स तां पत्नीवदुपचरति। यदा तु तेन तस्याः दुःखोत्पादनेन वीभत्सतया अविधेयतया अनात्यन्तिकत्वेन स्वभावो दृष्टस्तदा भीतो नैषा मम पत्नी पिशाच्येषेति। तदा तस्यां विरज्यति। एवं संस्कृतस्वभावदर्शिना विरज्यन्ति [४] प्राज्ञाः। आहचात्र।

यत् संस्कृतं न तन्नित्यं यदनित्यं न तच्छुभम्।
न सुखं तत् यदशुभं यद्दुःखं तदनात्मकम्॥

चत्वारो विपर्य्यासा एकस्मिन्नेव संस्कृते संभवन्ति यतस्तस्मात् सर्व्वे क्लेशा अवस्तुका इति

## अशुचिचिन्तानाम तृतीयं प्रकरणम्।

अत्राह। उक्तस्त्रयाणां विपर्य्यासाणां प्रहाणोपायः। चतुर्थस्य विपर्य्यासस्येदानीमुच्यतां प्रहाणोपाय इति। उच्यते।

अहं ममेति[५] वा दर्पः सतः कस्य भवेद्भवे।
यस्मात् सर्व्वेऽपि सामान्या विषयाः सर्व्वदेहिनाम् ॥ 76.

अहंकारममकारौ खल्वपि राजन्याधिक्येन वर्त्तेते इति। तयोः प्रतिषेधेन भूयसा राजैवानुशास्यते। तत्राहङ्कार आत्मन उत्कर्षविशेषपरिकल्पनादुपजायते अहं प्रभुरिति। ममकारस्तु स्वीकृतार्थवशित्व-कल्पनायामुपजायते। ममेमे विषया इति। दर्पो दृप्तता [६] गर्व्वो मद इत्यर्थः। भव: संसारः कर्म्मक्लेश-परायत्तस्य जन्ममरणपरम्परया गतिपञ्चकपर्य्यटनं। तत्र वर्त्तमानस्य कस्य नाम विदुषो ऽहंकारममकाराभ्यां दर्प उत्पद्यते। यदि हि कस्यचित् क्वचित् असाधारणमैशत्वं स्यात् तदा युज्येतास्य तदालम्बनो दर्पोऽहमेवैषां विषयाणां स्वामी ममैव चैते विषया इति वशित्वदर्शनात्। न चैतत् संसारपर्य्यापन्नस्य बालस्य सम्भ[७]वति। तथाहि सर्व्वसत्वसाधारणकर्म्मनिर्ज्जाताः सर्व्वे रूपादयो विषयाः तदेषु सर्व्वसत्वसाधारणपरिभोगेषु साधारण-तरु-षण्ड-मण्डपादिष्विव न युक्तोऽहंकारममकारपरिग्रहाद्दर्पः। राजनटवत्। यथा राजनटो मुहूर्त्तेन नटो मुहूर्त्तेन राजा मुहूर्त्तेनामात्यो मुहूर्त्तेन ब्राह्मणो गृहपतिर्दासश्च भवति। तथा राजा-नवस्थितः। पञ्चगतिरङ्गनाटनात्। भवति चात्र।

ऐश्वर्य्यभोगसम्पदा य[८]स्मात् पुण्येन लभ्यते।
तस्मात् कर्म्मात्मके लोके न दर्पो युज्यते सतः॥

अत्राह। यस्मात् सर्व्वारम्भो राजन्यधिकृतः तस्माद्धिकारनिमित्तस्तस्य दर्पो युज्यते इति। उच्यते।

गणदासस्य ते दर्पः षड्भागेन भृतस्य कः।
जायतेऽधिकृते कार्य्यमायत्तं यत्र तत्र वा ॥ 77.

समुद्भूतादत्तादानेऽपि प्राथमकल्पिके लोके क्षेत्रपरिरक्षार्थं प्रतिवलः पुरुषो महाजनेन धान्य-षड्भागवेतनेन भृतः। कथन्ना [१५]

[1]क्षं तदाग्निना सर्व्वस्थानानि दग्धानि। तत्र बहूनि प्राणिसहस्राणि घातितानि तस्य तेन राज्ञानुमोदितम्। तदेवं यत्र मौख्यं तत्र दया न विद्यते। यत्र दया नास्ति तत्र कुतः पुण्यावाप्तिः। राज्ञां चैव सर्व्वमस्ति। अत एषां गोपायतामपि धर्म्मो न संभवति। आह च।

अहिंसा मूलं धर्म्मस्य यस्मादाहुः कृपात्मकाः।
तस्मान्न विद्यते धर्म्मो निर्द्दये तु नराधिपे।

अथाह। ऋषिप्रणीतेन ह्यत्र धर्म्मेण हिंसां कुर्व्वतोऽपि राज्ञो नास्त्यधर्म्म इति। उच्य[२]ते।

ऋषीणां चेष्टितं सर्व्वं कुर्व्वीत न विचक्षणः।
हीनमध्यविशिष्टत्वं यस्मात्तेष्वपि विद्यते। 89.

ऋषीणामिह कायवाङ्मनसां विचेष्टितं सर्व्वमेव पण्डितेन न कर्त्तव्यम्। यस्मात् ऋषिष्वपि हीनमध्यविशिष्टत्वं विद्यते। तत्र यस्य शास्त्रे हिंसा कारणवशात् धर्म्मो भवति स हीनः। यस्य स्यान्न स्यात् इति संशयः स मध्यः। यस्य त्वधर्म्म एव हिंसेति स विशिष्टः। तस्मात् सर्व्वेषां ऋषीणां शास्त्रमप्रमाणम्। तत्र यदिष्टमृषिप्रणीतेन ह्य[३]व धर्म्मेण हिंसां कुर्व्वतोऽपि राज्ञो नास्त्यधर्म्म इति तन्न। विश्वामित्रवशिष्ठजामदग्न्यवत्। विश्वामित्रवशिष्ठजामदग्न्यानां चौर्य्याभक्ष्यभक्षणागम्यगमनप्राणातिपातश्रवणात्, तत्र विश्वामित्रस्य चौर्य्यमभक्ष्यभक्षणं च श्रूयते श्वपचेभ्यः किल श्वमांसमपजिहीर्षुणोक्तम्।

न ते शक्यं तर्त्तुं जीवता कर्म्म पापं प्रायश्चित्तं ह्येतदस्मद्विशेषात्।
मृतश्चाहं तर्त्तुं पापमेतन्न शक्तः तस्माद्ध्येतत् भक्षयिष्ये श्वमांसं॥ [४]

वशिष्ठोऽक्षमालायां चण्डाल्या[ं] अक्षिप्रतिपन्नः श्रूयते। ततः किल पुत्रा आजाता इति। जामदग्न्येनापि वत्सापहरणकोपात् कार्त्तवीर्य्यस्यार्ज्जुनस्य बाहुसहस्रं पातितं, एवं ह्याह।

दान्तस्य क्षमिणोऽपि दुर्ज्जनजनै स्तैस्तैर्व्वलीकव्रणैः
सामर्षं क्रियते बलादपि मुनेर्व्युत्क्रान्तधैर्य्यं मनः।
गोर्वत्सापनयेन दोहसमये हम्भारवैस्तत्कृतं
यद्रामस्य सुनिर्म्मलस्य परशोर्धारां प्रविष्टा नृपाः॥

[५] तथा तेनैव मात्रा संचोदितेन त्रिःसप्तकृत्वः पृथिवी निःक्षत्रिया कृता। एवं च किल तस्य मात्रोक्तम्।

ऋजुना मृदुना तपस्विना शतशो मान्यतमेन चाहवे।
न जगस्य विनाशकारणं न परैरेकमपि व्यपेक्षितम्॥
अपकारमयेन कर्म्मणा न नरस्तुष्टिमुपैति शक्तिमान्।
अधिकां कुरु वीर यातनां द्विषतां मूलमशेषमुद्धर॥ इति॥

[1] [Leaf 16 of the MS.]

ततस्तस्य धनुर्निनादशब्दः श्रूयते ।

प्राकारशृङ्गाग्रतिवर्त्त[६]मानो
गृहाणि भिन्दन्निव पार्थिवाणाम् ।
स जामदग्न्यस्य धनुर्निनादो
जग्राह केशेष्विव कार्त्तवीर्य्यम् ॥

आह चात्र, न तत् प्रमाणं कर्त्तव्यं शास्त्रमात्मार्थपण्डितैः ।
यस्यार्थं पुरुषाः कृत्वा व्रजेयुर्दुर्गतिं ध्रुवम् ॥

शास्त्रार्थं हि प्रमाणीकृत्य स्फीतां वसुमतीं सम्यक् परिपालितवन्तो यस्मात् पुरातना राजानस्तस्मादपि शास्त्रं प्रमाणम् । उच्यते ।

पुत्रवत् पालितो लोकः पुरतः पार्थिवैः [७] शुभैः ।
मृगारण्यीकृतः सोऽद्य कलिधर्मसमाश्रितैः ॥ 90.

कलियुगात्पूर्व्वोत्पन्नैः पार्थिवैश्चक्रवर्त्यादिभिः शुभैर्युक्तायुक्तपरीक्षकैः धर्म्मानुकूलं शास्त्रं प्रमाणीकृत्याधर्म्मानुकूलं परिवर्ज्य दशकुशलकर्म्मप्रतिष्ठितैः प्रियैकपुत्रकवत् जगत्प्रेमानुगतैः पालितो लोकः । साम्प्रतं तु कलियुगोत्पन्नैः पार्थिवैः स्वचित्तदौरात्म्यपरायत्तैरर्थमात्रतृष्णापरैरधर्म्मानुकूलं शास्त्रं प्रमाणीकृत्य धर्म्मानुकूलमुत्सृज्य त[८]थायं लोको निःकरुणैरुद्दामितो यथा मृगारण्यीकृत इत्यतोऽपि नाधर्म्मयुक्तं शास्त्रं प्रमाणमिति । अपरिसंजातेक्षुत्लेच्छपीड़नवत् । यो हि दस्युर्मोहादपरिसंजातमिक्षुं पीडयति सोऽनर्थमेव करोति नार्थं, तद्वत् राजा चेत् पालनीयान् न पालयति, न तस्यैहिकार्थो न पारत्रिकः । अपुण्यकरणात् । आह च ।

स्वराष्ट्रपरराष्ट्रेषु न विभागकृतोऽत्र यत् ।
प्रजा भवन्ति सुखिनः तच्छास्त्रं संस्कृतं बुधै[१६क]: ॥

अत्राह । राज्ञः खल्विह शत्रूंश्छिद्रेषु प्रहरतो नास्त्यधर्म्मः शास्त्रदृष्टित्वादिति ।

उच्यते । छिद्रप्रहारिणः पापं यदि राज्ञो न विद्यते ।
अन्येषामपि चौराणां तत् प्रागेव न विद्यते । 91.

यदि खलु शत्रूनन्यान् वा छिद्रेषु प्रहरतो राज्ञः पापं न विद्यते । ननु राजतस्करादन्येषामपि चौराणां धनारक्षकाणां किंचित् छिद्रं प्राप्य परधनमपहरतां छिद्रप्रहारित्वात् प्रथमं पापेन न भवितव्यम् । छिद्रप्रहारित्वेन तेषां ज्येष्ठभूतत्वात् । पश्चाद् राज्ञो [१] न चैतदेवमिष्टमित्यतो यदिष्टं राज्ञः छिद्रेषु प्रहरतः पापं नास्तीति तन्न । अजितसेनराजपुत्रवत् । केनचित् किल राज्ञा अमात्यः प्रोक्तो यदा मे मरणं भवति तदा अस्मद्भ्रातरमजितसेनं राजकुमारमभिषेक्ष्यसीति । ततस्तेनामात्येन तस्मिन् राजनि मृते छिद्रप्रहारिणा स राजकुमारो घातितः । आत्मना च तद्राज्यं अवष्टब्धं । तस्यातीवाकीर्त्तिर्लोके प्रतिष्ठिता पापाचार इति । परत्र चापुण्यम् । तद्वत् राज्ञां छिद्रप्रहा[१]रिणां कथमकीर्त्तिः पापञ्च न भविष्यतीति । आह चात्र ।

यत् कृष्णं कर्म्म कृतं न तस्य संजायते फलं शुक्लम् ।
नहि पूतिवृक्षबीजाच्चम्पकबीजाङ्कुरो भवति ॥

अत्राह । राज्ञो रणमुखे शत्रून् जित्वा महान् परितोषो भवति स्वशौर्य्यविक्रमार्ज्जितां च धन-सम्पदमनुपश्यतः । अथास्य रणे मृत्युर्भवति, तदा ध्रुवमस्यात्मनः परित्यागात् स्वर्गगामित्वमिति । उच्यते ।

सर्व्वस्वस्य परित्यागो म[४]द्यादिषु न पूजितः ।
आत्मनोपि परित्यागः किं मन्ये पूजितो रणे ॥ 92.

इह द्यूतमद्यवेश्याङ्गनासु त्रिषदं सर्व्वस्वमपि परित्यजन्तः पुण्यभाजो न भवन्ति । व्यसनानुपदत्वात् तत्त्यागस्य न सज्जनमनांसि आराधयन्ति । एवं आत्मभावपरित्यागो रणे न पूज्यते । तस्यापुण्याय-तनत्वात् । कथं हि नाम युद्धे ससंरम्भमभिवाधतः कृपाविपर्य्यासात् परस्मिन्निष्ठुराशयस्य विनिपातनाय परशिरसि विनि[५]विष्टदृष्टेः समुद्यतायुधस्य परेण विनिपातितस्य स्वर्गगमनं सम्भावयितुं युज्यते । तत्र यदिष्टं रणमुखे ध्रुवं मृतस्य स्वर्गगमनमिति तन्न । आभीरीश्वशुरशरीरदानवत् । काचिदाभीरी भर्त्तरि प्रोषिते श्वशुरमतीवावमन्यते स्म । अथ स वृद्धाभीरः तस्मिन्नागते पुत्रे तमर्थमावेदितवान् । एवं चाह, यदि ते पत्नी पुनरप्यस्मास्ववमानं करिष्यति न ते गृहे वत्स्यामीति । स च न स्त्रीभीरुः पि[६]-तृभक्तश्चातः तां परिभाष्याह । स[ा] चेत् त्वं पितरमवमन्यसे, न ते मम गृहे वासोस्ति । दुःकरमप्यस्य कुरु दुर्द्देयश्चास्मै प्रयच्छेति, तया तथैव प्रतिज्ञातम् । अथ सा पुनः प्रोषिते भर्त्तरि चकितचकिता परेणादरेण श्वशुरस्य शुश्रूषां चकार । स्नानानुलेपनमाल्यदानान्नभोजनपानादिना प्रणीतेन दिवस-मुपस्थाय रात्रावुष्णोदकेनास्य पादौ धावयित्वा तैलेन म्रक्षयित्वा वस्त्राण्य[७]मुच्य निर्व्वसना दुष्टयोगा-न्वितेन क्रमेण शयनमारोढुमारब्धा । वृद्धाभीर आह । पापे किमिदमारब्धमिति । आभीर्य्याह । भर्त्ताहमुक्ता दुष्करमपि त्वयास्य कार्य्यं । दुर्द्देयमपि देयमिति न चास्माद्दुष्करतरमस्ति दुर्द्देयाच्च दुर्द्देय-मिति । वृद्धाभीरोऽब्रवीत् । एष उपायो हीतो निर्गमनाय, तुष्टा भव । न पुनरिह गृहे स्थास्यामीति उक्त्वा निर्गतः । स चास्य पुत्र आगतः । पितरमपश्यन् पत्नीं पृच्छति । सावोचत् । स्वामिन् न मया कि[८]ञ्चित् परिहीणं परेणादरेण स मया ऋतुसुखेन स्नानानुलेपनभोजनादिनोपचरित इति सर्व्वं निवेदयति । ततस्तेन स्वामिना निर्भर्त्स्य गृहान्निःकासिता । पिता च प्रसाद्य स्वभवनं प्रवेशितः । यथास्या आभीर्य्या दुष्टभावायाः शरीरप्रदानं न पूजितम् । एवं राज्ञां दुष्टचेतसां रणे जीवितपरित्यागो न पूजितः । लोके च दुष्टत्वात् मद्यादिषु सर्व्वस्वपरित्यागो न पूजित इति । आह च ।

रणे मृतस्य गमनं मेरुप्र [१६]

[1]र्म्मणा ।

विप्रोपि कर्म्मणा शूद्रः केन मन्ये न जायते । 98.

यदि हि इदानीं अक्षत्रियोऽपि क्षत्रियकर्म्म कुर्व्वन् क्षत्रियो भवति । शूद्रोऽपि हि नाम ब्राह्मण-कर्म्म कुर्व्वन् ब्राह्मणो भविष्यति प्रतिगृह्णन्नधीयानश्च; तथाप्यन्योप्यन्यदीय कर्म्म समाचरन् स एव स्यात् । तत्र यदिष्टं कर्म्मणा क्षत्रियो भविष्यतीति । तन्न । नौपारगमनवत् । यथा नौः पारं गच्छत्यागच्छति । तत्र नद्याः उभयकूलस्थितौ ब्रुवाते नौः पारं गता नौः पारंगतेति । न च किं[२]चित् सिद्धं पारमस्ति । स एवासिद्धः ब्राह्मणः क्षत्रियो वा । यदि शूद्रः कर्म्मणा क्षत्रियो भवत्येवं विप्रोऽपि कर्म्मणा शूद्रो भविष्यति । आह च ।

सद्यः पतति मांसेन लाक्षया लवणेन च ।
त्र्यहेण शूद्रो भवति यो विप्रः क्षीरविक्रयी ॥

इत्यादि । आह चात्र ।

कर्म्मणा यदि वर्णाः स्युर्ज्जातिस्तत्र न कारणम् ।
न च द्वाभ्यां भवन्त्येते जातिः प्राग्दूषिता यतः ॥

अत्राह । राज्यैश्वर्य्येण हि महता महतो जनस्य श[३]क्योत्यैश्वर्य्यसंविभागं कर्त्तुं कालेन यतः तस्मात् महदैश्वर्य्यमेष्टव्यं राज्ञेति उच्यते ।

पापस्यैश्वर्य्यवद्राजन् संविभागो न विद्यते ।
विद्वान्नाम परस्यार्थे कः कुर्य्यादात्मनो वधं ॥ 99.

सत्यं राज्ञा महदैश्वर्य्यं महता कालेनोपार्ज्जितं; शक्यं महाजनस्य सम्विभक्तुं तत्तु न विना महाजन-पीड़या शक्यं निष्पादयितुं, अवश्यं च महाजनपीड़या महता पापेन भवितव्यं, यथा[४]ऐश्वर्य्यं संविभज्यते नैवं तन्निमित्तमवद्यमुपचितं सम्विभक्तुं पार्य्यते केवलमेकाकिनैव तद्दुःखमनुभवितव्यम् । तत्कोऽयमपण्डितः परस्मै अल्पोपकारार्थं सम्विभक्ष्यामीति अनल्पानर्थप्रदानदक्षमसाधारणमवद्यमुपचिन्वन्नात्मनो वधमात्मनः कुर्य्यात्तदिदं ह्रियः स्थानं न मदस्य । महिषोपघातवत् । शूनिकदारकवच्च । यथा महिषः स्व[५]परार्थं एकेन हन्यते बहुभिः परिभुज्यते । घातकस्यैव पापम् । तथा राजा राज्यहेतोः पापं कर्म्म करोति, बहवश्च परिभुंजते । तथाच शूनिकदारकोऽधर्म्मभयान्न मारयति । स च स्वजनेनोच्यते मारय त्वं यस्तत्राधर्म्मो भविष्यति स सर्व्वेषामस्माकं समतया भविष्यतीति । तेनोपायेनोक्तं महती मे शिरसि वेदना तां भाजयथेति । त ऊचुर्न्न शक्यत इति । स प्राह । तत् कथमपायवेदना[६]समतया भविष्यतीति । आह चात्र ।

अनित्यमिह लोके यत् परत्र च सुखावहम् ।
तत् कर्त्तव्यं मनुष्येण परत्र सुखमिच्छता ॥

[1] [Leaf 17 of the MS.]

अत्राह । राज्ञः खल्विह महत्यैश्वर्य्ये अवश्यमेव महता मानेन भवितव्यमिति उच्यते ।

दृष्ट्वा समान् विशिष्टांश्च पराँश्च्छक्तिसमन्वितान् ।
ऐश्वर्य्यजनितो मानः सतां हृदि न तिष्ठति ॥ 100.

परत उत्कर्षमात्मनः पश्यतो मानः स्यात् । स चानवस्थितः परापेक्ष एवेति न विद्वांसो [७] मन्यन्ते। तस्मादपहाय मानं जगते हितमाधित्सुना गुरव इव स्वामिन इव परे नावमन्तव्याः। तदेवं कुर्व्वाणाः स्युरेव ते भाजनं सम्पदां, जगदाराधनप्रवृत्तत्वात् वासुलपत्नीवत् । वासुलब्राह्मणस्य पत्नी कथयति स्म न मत्सदृशी स्त्री काचित् स्त्रीरूपेण पृथिव्यां संविद्यते न च त्वं मामनुरूपेण वस्त्रालङ्कारेणार्च्चयसीति । सा तेनोपायेन रुद्रनाम्नो राज्ञोऽन्तःपुरं प्रवेशिता । तस्यास्तत्र परिचारिकां दृष्ट्वा रूपमदो न[८]ष्टः श्रीमेव राजपत्नीम् । तथा राज्ञाऽत्मनः समान् विशिष्टांश्च दृष्ट्वा मदं चाहङ्कारश्च युक्तं त्यक्तुम् । आह चात्र ।

दीने राजनि तावत् मानो राज्ञो न युज्यते कर्त्तुम् ।
तुल्ये श्रेष्ठे च नृपे कुतोऽवकाशोस्ति मानस्य ॥

## अहङ्कारविपर्य्यासप्रहाणोपायन्नाम चतुर्थं प्रकरणम् ।

अत्राह कुतः पुनरिमे सुभाषितरत्नाशया यथास्थितलौकिकार्थतत्वप्रतिपादका वैराग्यहेतवो लभ्यन्ते । उच्यते, बुद्धेभ्यो [१७क] भगवद्भ्यः । कीदृशाः खलु बुद्धा भगवन्तः, महाकरुणावेशात् सर्व्वथानिन्द्याचिन्त्याशेषजगदर्थसम्पादनपराः ।

तथाहि । न चेष्टा किल बुद्धानां अस्ति काचिदकारणा ।
निःश्वासोऽपि हितायैव प्राणिनां संप्रवर्त्तते ॥ 101.

बुद्धा भगवन्तः सर्व्वजगदनुग्रहाशयक्षिप्तकर्म्मनिर्म्मितत्वात् "यथाप्रत्ययं फलमिति" जगद्धिताधानोदयदक्षाभिः समीहाभिः सकलं जगदनुगृह्णन्ति । नहि सास्ति काचित् कायपरिस्पन्दलक्षणा चेष्टा या सत्त्वोपकारानुपयोगिनी[२]ति, आस्तां ज्ञानपूर्व्विका तावच्चेष्टा । योऽप्ययं प्रेरकचेतनाविशेषाक्षेपनिरपेक्षः स्वरसवाही जन्मनः प्रभृत्यामरणादहर्निशमनुवर्त्तते निश्वासः सोऽपि नामैषां प्रवर्त्तते जन्मभृतां हितायैव । तथाह्येषां बुद्धानां भगवतां निश्वासा विनिर्गत्योपरि नरकभाजनानां महान्तः कालमेघा विपरिणमन्ते, कज्जलाञ्जनराशय इव नारकजनमनोहराः संच्छादिताशेषनरकभाजनमण्डलाः पटुमधुरनिरन्तर स्वनि[३]तैराह्लादयन्तो नारकान् स्वच्छ-स्वादु-शीतोन्मुक्तवार्य्योघैर्निवारयन्तो नारकाग्निम् तत्प्रत्ययमपेतदुःखानां नारकाणां कस्यानुभावादिदमुपनतमस्माकमिति मीमांसापरिगतहृदयाणां, मनःप्रसादायतनताथागताचिन्त्यरूपकायसन्दर्शनेनावर्ज्जितचित्तसत्त्वानां बुद्धे भगवति अभिप्रसादात्क्षयक्षयिताशेषाकुशलकर्म्मराशीनां तदन्वयमेव च समाक्षिप्तमोक्षभागीयानां अत्यन्तोपकारा[४]न्निःश्वासोपि हितायैव प्राणिनां संप्रवर्त्तते । एवमन्यत्रापि योज्यं । तदेवं मतिमानवमितसंसारदोषः तत्क्षयोद्युक्तः सर्व्वथा यथोपवर्णितसुभाषितरत्नाधारे त्रिभुवनगुरौ बुद्धे भगवति प्रसादपुरःसरमर्हति मनो निवेशयितुम् । पाराशरकुलभिक्षुवत्। कश्चित् भिक्षुः पाराशरकुलं गतः । स यज्ञाचार्य्यगृहं प्रविष्टस्तेन निमन्त्रितो मम गृहे त्वया वर्षा करणीया । अहं

पिण्डपातं[५]दास्यामीति। तेन तथैव कृतं। तस्य च प्रासादस्याधस्तात् बहूनि यन्त्रकार्य्यकरणे पत्राणि सन्ति। ततस्तेन स भिक्षुः प्रासादे स्थापितोऽत्र त्वं यथेच्छसि तथा तिष्ठेति। स तस्मै निर्गताय चीवरमूल्यं दत्त्वा मृतकवेतनं ददाति स्म। भिक्षुराह। न ते मया किञ्चित् कर्म्म कृतं कस्मात् वेतनं ग्रहीष्यामीति। दानपतिराह। न त्वं मुहूर्त्तमप्यकर्म्मक इह गृहे केनचिदीर्य्यापथेन स्थितः। पत्रा[६]णि चास्य दर्शयति, लाभं च तत्कृतं। यथा तस्य भिक्षो र्न कश्चिदीर्य्यापथोऽस्ति योऽस्य नोपकाराय भवेत् तद्यन्त्रवाहनेन। एवं भगवतो बुद्धस्य न काचित् कायवाङ्मनश्चेष्टास्ति यात्मा वा अनर्था वा स्यात्। आह च।

शरीरवाचो मनसां प्रवृत्तिः स्वार्था मुनेर्नास्ति न चाप्यनर्था।
महाकृपाविष्टविशुद्धबुद्धेः परोदयायैव पुनः प्रवृत्तिः॥

तं चोपासीनाः सर्व्वव्यसनान्यति[७]वर्त्तन्ते। यावन्मरणभयमिति। तथाहि।

यथा, सर्व्वस्य लोकस्य मृत्युशब्दो भयङ्करः।

प्रियजीवितवियोगकारकत्वात्।

तथायं सर्व्वविच्छब्दो मृत्योरपि भयङ्करः।

यतः तद्विशेषसीमानमतिवर्त्तन्ते तथागतस्य वर्त्मनः सम्यगनुष्ठातारस्तथानुष्ठानं वीजानि च कुशलमूलानि तथागतनामधेयश्रवणादाधीयन्ते। यथा चोक्तं भगवता ये मम नामधेयं श्रोष्यन्ति सर्व्वे ते त्रयाणां यानानां [८] अन्यतमेन यानेन परिनिर्व्वास्यन्तीति। बन्धनमोक्षबन्धनाधिकृतज्वरवत्। कश्चिद्बन्धनाधिकृतः पुरुषो राजकुलेन स्थापितो यस्य सर्व्वबन्धनमायत्तम्। राज्ञा च पुत्रे जाते सर्व्वबन्धन-मोक्षो घोषितस्तेन च शब्देन सर्व्वलोको हर्षितः। सत्यैवैको बन्धनाधिकृतो भीतो ज्वरितश्च तं बन्धनमोक्ष-शब्दं श्रुत्वा। एवं तथागत उत्पन्ने सर्व्वलोकः प्रीतो वर्ज्जयित्वा मारम्। आह चान्तशः, बुद्ध इत्येव घोषो [१७]

गीतानि चकार। यथास्य राज्ञः स्नेहविपर्य्ययानवस्थानाच्चोन्मादः तद्वत् पृथक्जनानां। विद्वांस्तस्मात् स्नेहविपर्य्यासात् चित्तानवस्थानादनुचिन्तयन्त्युन्मादम्। तथाह्येषां यत्रैव विषये तीव्राभिष्वङ्गस्तत्रैवातीव-परित्यागो दृश्यते, तत् को भवस्थमब्रूयादुन्मत्त इति। आह चात्र।

उन्मादात् कर्म्मैवानर्थं कुरुते नरस्य नोन्मादः।

न ह्युन्मादश्चित्रं करोति पुरुषं यथा कर्म्म॥

तदेवं स्वूनास्थानसमत्वादुन्मादस्थानत्वाच्च पण्डितैः परिव[२]र्ज्जनीयो भवः, स च सर्व्वकर्म्मप्रवृत्ति-निरोधेन परिवर्ज्जयितव्यः। अस्ति चास्य भवस्य परिवर्ज्जनोपायः सर्व्वकर्म्मक्षयः, स कथं भवतीति तदुपायावेदनाय आह।

हीयमानां रुजं दृष्ट्वा गमनादौ विपर्यये।

सर्व्वकर्म्मक्षये तेन करोति मतिमान् मतिम्॥ 159.

यथा गमनादिजनिता रुजः चंक्रमणादिपरिवर्ज्जनेषु पूर्व्वाविधपरिचयात् अनुपूर्व्वं क्षीयन्ते, तथा सर्व्वेण सर्व्वरुजः सर्व्वकर्म्मोपच्छेदैस्ततः स[३]कलोच्छेदमन्वयमानः कुशलः सर्व्वकर्म्मक्षयायायं यतते, तथा अन्योऽपि यतमानस्तां जातिं लप्स्यत इत्याख्यातव्यो यत्नः सर्व्वकर्म्मक्षयलभ्ये. सर्व्ववेदयितृत्वनिरोधरूपेण मतिमता निर्व्वाणे, दीर्घाध्वगवत्। यथा दीर्घाध्वगो यथा यथा गच्छति तथा तथा दुःखीभवति विषयस्य श्रमदुःखेन पथ्यदनपरिचयदुःखेन च, तथा बालाः संसाराध्वनि वर्त्तमाना आश्रयदुःखेन शुभक[४]र्म्मपरि-चयदुःखेन च बाध्यन्ते। अथवा दीर्घाध्वगो गमनदुःखेन पीड़ितः स्थानमारभते ततोऽस्य गमनदुःखं परि-वर्त्तते, स्थानदुःखमपि निषद्यया, निषद्यादुःखमपि निषद्यया, यदि पुनर्निषद्यादुःखपरिखिन्नस्तत्यागा-दन्यदीर्य्यापथान्तरं नारभते तदास्येर्य्यापथिकदुःखनिवृत्तिरत्यन्तं सम्भाव्येत। एवं सर्व्वकर्म्मक्षयेऽपि वाच्यम्। तदेवं सर्व्वकर्म्म[५]क्षयः सर्व्वदुःखनिवृत्तिकारणमिति सर्व्वकर्म्मक्षये मतिमता मतिः कार्य्येति। आह चात्र।

यथा सुखं चैतसिकं श्रेष्ठं कायसुखादपि।

तथा कर्म्मक्षयसुखं क्लेशक्षयसुखादिह॥

इतश्च युक्तः संसारत्यागो धीमतां भयकारणत्वात्, तथा हि।

यदैकस्यापि कार्य्यस्य दृश्यते नादिकारणम्।

तदा कस्य भयन्न स्यात् दृष्ट्वैकस्यापि विस्तरम्॥ 160.

इह एकस्यापि तावत् कार्य्य[६]स्य भौतिकस्य, वातिकस्य वा पैत्तिकस्य वा पूर्व्वपारम्पर्य्येण परीक्ष-माणस्य आदिकारणं यदा न दृश्यते अनादिमत्त्वात् जगत्प्रवृत्तेरेवमेवैकस्यापि कार्य्यस्यानन्त्यं सविस्तरं दृष्ट्वा तदा कस्येह पुरुषस्याधिगतभयस्य जगत्प्रवृत्तिदर्शने भयं न स्यात्। युक्तन्त्वस्यापरिमितप्रबन्धगडनदुःसञ्चर-तरायां संसाराटव्यां नित्यमेवोद्विजितुं, त[७]दनुरूपं च योनिशः प्रधानं भावयितुम्। घटवत्। यथा हि घटेऽनेकप्रत्यया मृत्पिण्डदण्डचक्रसूत्रोदकपुरुषप्रयत्नादयो दृश्यन्ते घटकरणे तावत् प्रागेवान्येषां गुरुतराणा-मर्थानां निष्पादने। आह चात्र।

[Leaf 20 of the MS.]

कालस्यानन्तत्वादादिश्च न विद्यते यतो जगतः।
तस्माज्जन्तोर्दुःखं पूर्व्वां कोटिं समाज्ञातुम्॥

अपि च। यदयमभिलषन् तृष्णया परिस्पन्दते, तस्य यदि नियोग[८]तः सिद्धिः स्यात् युक्तं स्पन्दितुं तस्य च।

सिद्धिः सर्व्वस्य कार्य्यस्य नियमेन न जायते।
नियमेन कृतस्यान्तः किं तदर्थं विहन्यसे॥ 161.

इह हि सर्व्वस्यैव कार्य्यस्य प्रारब्धस्य नियमेन सिद्धिर्भवति वा न वा। सिद्धस्य तु सर्व्वस्यैव कार्य्यस्य नियमादवश्यमेव विनाशो भवति। तत्र यस्य कृतस्य सुचिरादप्यवश्यमेव नियमतो विनाशः किं तदर्थमयं बालो विहन्यत इति। [२०क] अतोऽवधूय जालिनीं तदुच्छेदाय यतितव्यम्। कुम्भकारपाकवत्। यथा कुम्भकारपाके सिद्धिरनैकान्तिकी निष्पन्नानाञ्च कुम्भकारभाजनानां नियमतो विनाशस्तथा सर्व्वेषां लौकिकानां कार्य्याणां सिद्धिरनैकान्तिकी। आह चात्र।

सर्व्वेषां भावानां कृतकत्वान्नास्ति नियमतः सिद्धिः।
तस्माद्भाव्यस्तेषां नियमेनैव ध्रुवो नाशः॥

यथा च कायस्य ध्रुवो विनाशः। तथा कर्म्मणोऽपीति प्रतिपादयन्नाह।

यत्नतः क्रियते [२] कर्म्म कृतं नश्यत्ययत्नतः।
विरागोऽस्ति न ते कस्मिन्नेवं सत्यपि कर्म्मणि॥ 162.

इह खलु महता यत्नेन बहुभिः साधनोपायैः कर्म्म क्रियते तत्तु महता प्रयत्नेन बहुभिरपि साधनैः कृतमयत्नादेव कायवद्विनश्यति। तदेवमतिमहत्पुरुषकारधनमपार्थकमिति कर्म्मणि कथं नाम न स्याद्वैराग्यं विदुषः। तत्पुनः पुनस्तत्कर्म्माचरणाद्विरागाभावो जड़तामेव वेदयते, तत्क्रियतां वैराग्याव[३]सरः। न हि निष्ठुरा वृत्तिरुपकुर्व्वति शोभते। पर्व्वतशिलारोपणवत्। यथा पर्व्वतमूर्द्धनि शिला यत्नेनारोप्यते अयत्नेन पतति तथा सर्व्वलौकिक्यः प्रवृत्तयः। आह चात्र।

हेतुप्रत्ययसामग्र्या कर्म्म संस्क्रियते यतः।
तस्मा[त् य]त्क्रियते यत्नात्तद् वैकल्याच्च नश्यतीति॥

अत्राह यद्यप्ययत्नात् कार्यं नश्यति तथापि सुखहेतुत्वान्न तत्र वैराग्यं भवतीति। उच्य[४]ते॥

अतीतस्य सुखं नास्ति नाप्यप्राप्तस्य विद्यते।
वर्त्तमानोऽपि यात्येव श्रमोऽयं कस्य नाम ते॥ 163.

अतीतस्य तावत् विज्ञानस्य सुखं नास्ति निरुद्धत्वात्, अनागतस्यापि सुखं नास्ति असंप्राप्तत्वात्, वर्त्तमानस्यापि सुखं नास्ति स्थित्यभावात्। तदेवमसति सुखे तेनानुग्रहाभावात् सुखसम्भोगलालसस्य योऽयं सुखहेतुकर्म्मोपार्ज्जनश्रमो भवतः स कस्य [५] कृते भवतु, विफल एव सर्व्वथा सुखहेतूपार्ज्जनपरिश्रमोपा[या]यास इत्यभिप्रायः। नदीतीरगृहकरणवत्। केनचिन्नदीतीरे गृहं कृतं स च प्रदेशः स्फुटितः।

ततोऽन्यदनुतीरमेव कृतं सोऽपि स्फुटित एवमनवस्था जाता, एवं तस्य गृहकर्त्तुः महांश्च श्रमो, न च श्रम-फलावाप्तिः। तथा सर्व्वलौकिक्यः प्रवृत्तयः। आह चात्र।

चित्तक्षणचपलगतेः [६] कस्यार्थे सञ्चिनोषि कर्म्माणि।
कालत्रयेऽपि यस्मात् परीक्ष[्य]माणं सुखं नास्ति ॥

अत्राह। यद्यप्येवं तथापि स्वर्गसुखार्थमवश्यमेव कुशलं कर्म्म कर्त्तव्यमिति। उच्यते।

स्वर्गो निरयतुल्योऽपि विदुषां स्याद्भयङ्करः।
सर्व्वथा दुर्लभस्तेषां भवो यो न भयङ्करः ॥ 164

तत्र विविधसंक्लेशाय द्वारत्वात् तीव्रतरविषयसम्भूतक्लेशाग्निसन्दीपितत्वात् [७] मोहभूयस्त्वात् च स्वर्गमपि निरयवद्भयङ्करत्वात् परिवर्ज्जयन्ति विद्वांसः। ततश्च येषामनवगीतसुखसम्भोगरमणीया स्वर्गसम्पद् तया न जनयन्त्यास्थां तेषां तदन्यत्र भवे श्मशानभूमाविव कुतो रतिः। अपिशब्दश्चात्र भिन्नक्रमः स्वर्ग-शब्दानन्तरं द्रष्टव्यः। तिष्ठतु तावदन्यो भवः स्वर्गोऽपि विदुषां निरयतुल्य इति व्याख्येयं। बालबन्धन-मोक्षणवत्। तद्यथा बालो नाम राजा बभूव [८] क्रूरप्रकृतिरुपस्तीक्ष्णशासनः। तस्य बन्धनागारे यः प्रवेश्यते स करचरणग्रीवासु पञ्चभिर्व्बन्धनैर्गाढ़मबध्यते। स यदा न कदाचिदुपायेन कश्चिन् मोचयति तदा रक्षापुरुषाणामाज्ञापयति। अयं सर्व्वबन्धनेभ्यो मोक्तव्यः किन्तु येनैकेनेर्य्यापथेनेच्छति यावदायुः स्थास्यते। तेन सुगुप्ते स्थापयितव्य इति। "एष देवेति" राज्ञ आज्ञां शिरसि कृत्वा नूनं कुर्व्वन्ति। तत्र यो [१०] [1]बालराजबन्धनान्मुक्तो भवति तस्य बन्धनेन तुल्यं मोक्षणमपि भयङ्करमेव दुःखविशेषात्तथान्येषामपि महात्मनां नरकतुल्यस्तेषां कोन्योऽस्ति भवस्तद्विशिष्टो यो न भयङ्करः स्यात्। यथा बलिः सर्व्वलोकाधिपत्यं दत्त्वा बद्धः। किमयमन्यद्दत्वा मुक्तो दृश्यते। तथा येषां स्वर्गोऽपि दुःखहेतुत्वात् निरयसमस्तेषां कोन्यो भवा-न्तरोस्ति यो न भयङ्करः स्यात्। अपि च। यथा खलु पण्डिताः संसारदोषप्रत्यवेक्षानिपुणा दुःखाग्नि-ज्वालापरिगतमेकान्तदुःखं संसारं यथावदीक्षन्ते तथा खलु

संसारदुःखं जानीयात् यदि बालोपि सर्व्वशः।
गच्छेदत्यन्ततो नाशं सह [२] चित्तेन तत्क्षणम् ॥ 165.

यद्दुःखमाकारयन्त आर्य्याः संसारादुद्विजन्ते तद्यदि पृथग्जनः शक्नुयादध्यक्षयितुं तदा तत्क्षण-मेवास्य शतधा विशीर्य्येत हृदयमनवबोधात्त्वयमभिरमते संसारे। कृतज्ञतामहाकरुणाभ्यां तु सत्त्वोप-काराभिप्रायधैर्य्यावष्टब्धं संसारदुःखमार्य्याणाम् न तथोद्वेगकारणमिति न तेषामत्यन्तो नाशः शक्यः सम्भाव-यितुम्।

पृथग्जनस्तु सत्कायदृष्ट्यनुगमा[३]त् प्रतिपक्षभावनावैकल्यात् परमाणुशो नियतं विशीर्य्येत यदि सर्व्वथा संसारदुःखं जानीयात्। यक्षाभ्याहतवत् बालनायकवच्च। कश्चिद्यक्षेणाभ्याहतः, स च यक्षस्तेन न दृष्टः, तस्यैतदभवत्। अदृष्टे तावत् तस्मिन् यक्षे ईदृक् दुःखमुत्पन्नम् यदि दृष्टः स्यात् ततो मे तुषमुष्टिवत् कायो विशीर्णः स्यादिति। यथा च बालनायक आधिपत्यलोभात् जी[४]वित ......... गृह्णाति एवं

[1] [Leaf 18 of the MS.]

यदि बालोऽपि संसारदुःखमधिगच्छेत् तद्भयात् सर्व्वभवपरित्यागादत्यन्ततो नाशं गच्छेन्मोक्षमित्यर्थः। आह चात्र।

यथा बुद्धा विजानन्ति फलं पापस्य यादृशम्।
तथा बालो विजानीयात् स भवेत् तत्क्षणं जिनः॥

अपि च संसारे क्रियासु सामर्थ्यवतः समीहमानस्य सुखं स्यात्। स च निरूप्यमाणः।

अमानी दुर्ल[५]भः शक्तो मानी नास्ति घृणान्वितः।
उक्तः सुदुर्लभस्तेन ज्योतिर्ज्योतिःपरायणः॥ 166.

शक्तस्यैव क्रियासु पुरुषकारेणोपात्तसुखवेदनाय विषयोपार्ज्जनात् उपात्तपरिरक्षणाच्चावश्यमेव पुरुषस्य मान उपजायते। मानतश्चायमात्मानं विशेषतः परिकल्पयन्नधिकमसहमानस्तदुपजिघांसया निर्द्दयो भवति निर्द्दयस्य चास्यापायपर्य्यवसान[६]तया + + + + सम्पदो यतोऽस्य सुखानुभवः सम्भाव्येत। अत एव भगवता ज्योतिर्ज्योतिःपरायणः पुद्गलो दुर्लभः इत्युक्तं कुलभोगैश्वर्य्यज्ञानमानेन नियतमधःपतनात्। जामदग्न्यवत्। यथा जामदग्न्येन शक्तेन मानित्वात् त्रिःसप्तकृत्वः पृथिवी निःक्षत्त्रिया कृता नैर्घृण्यादतिदुर्लभो यच्छक्तोऽमानी स्यात् मानी च घृणान्वितः स्यात्। यत एवम[७] तोऽवोचद्भगवान् दुर्लभो ज्योतिर्ज्योतिःपरायण इति। यद्येवं मानिनः पापाचरणादपायनिष्ठा इति गर्हिता विपर्य्ययेण ब्रह्ममानिनः स्वर्गसुखसाधनधर्म्माचरणात् प्रशस्यास्ततश्च तैरेकान्तेन गर्हितः संसार इत्युच्यते। धर्म्मोऽपि वैपरीत्यादयुक्तः सङ्गस्तथा हि।

निवृत्तिविषयस्येह विषयः किल लभ्यते।
केनापि हेतुना धर्म्मो विपरीतोऽपि स स्मृतः॥ 167.

यः किल[८]विषयेष्वनास्थस्तान् विषयान् परित्यजति ब्रह्मचर्य्याभ्युपगमात्, तस्येह च्युतस्य ईश्वरकुले स्वर्गेषूपपन्नः तेन लोके नाङ्गीकृतश्चेति नात्राभिनिवेशो ज्यायान्, तिताडयिषुमेषवत्। यथा मेषस्ताडयितुमिच्छन् दूरतोऽप्यनिवृत्तः यथा विषयार्थी निवृत्तविषयः। एवं तावद्धर्म्मो विपरीतत्वात् त्याज्यः। यदपि तद्धर्म्मफलमैश्वर्य्यं तदपि वशित्वाभावाद्विविधव्यसनस्थानत्वाच्च, ना[१८क]स्थेयं विदुषा। तथा हि।

पुण्यस्य फलमैश्वर्य्यं तच्च रक्ष्यं सदान्यतः।
कथं नाम तदात्मीयं यद्रक्ष्यं सर्व्वदान्यतः॥ 168.

पूर्व्वकृतस्य हि कर्म्मणः फलमैश्वर्य्यं तच्चात्मीयसंज्ञितं तच्चेह सदैव संरक्ष्यते प्रत्यर्थिभ्यो, यदि तदात्मनीनं स्यान्नैव प्रत्यर्थिभ्यो रक्षणीयं स्यात्। यच्च परैराच्छेद्यत्वात् सततमाधीयमानरक्षाविधानं कथं तदात्मीयमिति शक्यं वक्तुम्। तदयं रक्षाविधाननिरन्तरः परमनिर्वृतः कदा नाम विषयरसमास्वादयेत्। तस्मात्फलमप्यस्य नान्[२]ग्रहाय पर्य्याप्तम्। गुरुवत्। यथा गुरुः नित्यमेवानुवन्द्यो नित्यं चाप्रमत्तेन भवितव्यं गुरौ। तथैश्वर्य्यं पुण्यबलनिर्जातं तच्च राजादिभ्यो नित्यमेव रक्ष्यम्। यच्च सर्व्वदा रक्ष्यं कथं तदात्मीयं भवति। अनवस्थितत्वाच्च लौकिकस्य धर्म्मस्य तत्रास्था न ज्यायसी। तथा हि

या या लोकस्थितिस्तां तां धर्म्मः समनुवर्त्तते।
धर्म्मादपि ततो लोको बलवानिव दृश्यते॥ 169.

लोको हि यां यां स्थितिं व्यवस्थापयति देशकुलगोत्राचारव्यवस्थया कन्यादानोद्वहनादिकं तां तां [३] धर्म्मः समनुवर्त्तते। तस्यास्तस्या स्थिते धर्म्म इति प्रसिद्धिगमनात्। न चैष स्वभावव्यवस्थितस्य न्यायो युज्यते, यद्देशकालभेदयोरन्यथात्वादन्यथा स्यात्। ततो नाचात्यन्तादरो युक्तः। दुहितृविवाहवत्। केनचित् पुरुषेण यवनेषु गतेन यवनः कश्चिदग्निं प्रज्वाल्य तस्मादग्नेर्विद्यया शब्दं निस्सारयन् दृष्टो दुहिता कल्पते भार्य्या भवत इति। स च पुरुषोत्यन्तरागचरितो दुहिता च तस्य स्वदेशे रूप[४]यौवनवती तिष्ठति। ततस्तेन पुरुषेण तस्य यवनस्य सकाशात् सा विद्या महता प्रयत्नेन द्रव्यप्रदानेन चार्थिता। स्वदेशं च गत्वा स्वां दुहितरं भार्य्यां कर्त्तुकामोऽग्निमिच्छति तमर्थं वाचयितुं। तेनाग्निनोक्तं अन्यथास्य देशस्थितिरिति। एवं धर्म्मादपि लोको बलवानिति। अत्राह। अभिलषितविषयसमुत्पादमन्तरेण सुखवेदनानुभवो नास्ति। स च विषयोत्पादः कृतपुण्यानामेव यस्मात् सम्भव[५]ति। तस्मात् विषयार्थिना कर्त्तव्य एव धर्म्म इति। उच्यते।

विषयस्य शुभेनेष्टो विषयः स च कुत्सितः।

श्रेयान् यस्य परित्यागो निष्पन्नेनापि तेन किम्॥

योयमिहेष्टपञ्चकायगुणात्मको विषयो रूपशब्दगन्धरसस्पृष्टव्यसंज्ञितः स शुभेन कर्म्मणा लभ्यते। स एव सत्त्वानां मोक्षकामानां कुत्सितोऽमेध्यलिप्तगात्र इव श्वा, यस्य च श्रेयान् परित्यागोऽनर्थमूलत्वात् अनित्याशुच्य[६]नात्मकत्वेनानिर्वृतिकरत्वात् रागादिक्लेशोत्पादकत्वेन प्रमादस्थानत्वाच्च निष्पन्नेनापि तेन न किंचित् प्रयोजनमिति व्यर्थ एव विषयफलधर्म्मोपार्ज्जनश्रम इति त्यज्यतामधर्म्म इव धर्म्मोऽपि सङ्ग इति। कम्बोजभैक्षचरणवत्। कश्चित् भिक्षुः कम्बोजेषु जनपदेषु भिक्षां गतः, स केनचिदुक्तः शब्देन कार्य्यार्थं मा तावदत्र किञ्चिद्वक्ष्यसि पिण्डपातं चरन्नवहास्यो भविष्यसि। एषास्मिन् वि[७]षये मर्य्यादा। तेन ऋजुना श्रद्धधानतया तथा कृतम्। ततस्तेन जनकायेन विज्ञातोऽस्मत्स्पर्द्धिना यन्त्रमेतत् तेन पुरुषेण कृत्वा अस्माकमनुप्रेषितमित्यहोऽस्योन्मेषनिमेषादि पुरुषवदुपपादितमेव सर्व्वं, प्रत्यङ्गानि वर्णयामास। ततस्तैरपि तादृशाण्येव यन्त्राणि कृत्वा प्रेषितानि तस्य पुरुषस्य। ततस्तेन पुरुषेणोक्तम् तस्य भिक्षो र्व्वाच-मिदानीं भाषस्व तत्सन्निरोधादिति। तेन तथाकृतमारोग्यादि-वाग्निस्सारिता। ततस्ते विस्म[८]यापन्ना एवमूचुः। अशक्यमेतदस्माकमनेन रञ्जिता वयमिति। स शठः भिक्षुप्रतिरूपः स्वरूपपरिज्ञानात् कुत्सित एव भवति तद्वदेतदिति। अत्राह। यद्यपि विषयस्य कुत्सितत्वात् विषयसाधनो धर्म्मो निष्प्रयोजन-स्तथापि आज्ञारसास्वादसुखगुरूणि राज्यानीति तदर्थं राज्ञाधिपत्येषु प्रवर्त्तितव्यमिति। उच्यते। नैव हि सर्व्वेषामाज्ञया कार्य्यं सम्भवति। ततश्च।

कार्य्यं नास्त्यनुपायस्य तस्य धर्म्मो निरर्थकः।

यस्य हि समीहितार्थसंसिद्धिरन्यथा न सम्भवति स [१८]

[1]चिद्राज्ञः पुत्रोऽतीव प्रियः स कदाचिद्युत्थितः स तेन राज्ञा संग्रामे निर्ज्जित्य गृहीतः। तस्य च राज्ञः तद्दोषदर्शित्वात् तस्मात् स्नेहो विगतः। एवं दोषज्ञे सर्व्वत्र रागो न तिष्ठतीति न केवलं सर्व्वदोषदर्शित्वाच्चिरं नास्ति रागः। इतश्च तत्प्रहाणं न सम्भाव्यते रागवत्स्वभावत्वात्। तथा प्रतिपादयन्नाह।

तत्रैव रज्यते कश्चित् कश्चित् तत्रैव दुष्यति।
कश्चित् मुह्यति तत्रैव तस्मात् कायो निरर्थकः॥ 175.

रञ्जनीयवस्त्वायत्तोदयो हि रागस्तच्च रञ्जनीयं[२]वस्तु स्वरूपासिद्धम्। यदेव ह्येकस्य रञ्जनीयं तदेवापरस्य द्वेषणीयं वोपलभ्यते। यदि च रञ्जनीयं वस्तु स्वरूपतः स्यात्। तत् सर्व्वदा सर्व्वस्य च तथैव स्यात्। नत्वेष नियमो दृष्टः। तथाहि। यत्रैको रज्यते, तत्रैवापरो दुष्यति। तत्रैवापरो मुह्यति। तस्माद्विषयकामः स्वरूपासिद्धत्वात् शून्यः। न चेवं रञ्जनीयवस्तुशून्यताभावना-तत्परस्य योगिनो रागप्रहाणं न सम्भाव्यत इति विद्यतएव रागप्रहाणम्। [३] मातृपत्नीदासीवत्। कस्यचित् पुरुषस्य पत्नीद्वयं तत्रैका मात्रा सह तिष्ठति। द्वितीया तु विना मात्रा। तत्र यदासौ माता दुहितरं पश्यति तदा तुष्टा भवति। तामेव दृष्ट्वा सपत्नी दुःखिता भवति। दासी तु दृष्ट्वोदासीना भवतीति। नास्ति रागादीनां आलम्बनस्य स्वरूपसिद्धिः। एवं तावदालम्बनासिद्ध्या रागाद्यसिद्धिं प्रतिपाद्य हेत्वसिद्ध्यापि रागाद्यसिद्धिं प्रतिपादयितुका[४]म आह।

विना कल्पनयास्तित्वं रागादीनां न विद्यते।
भूतार्थः कल्पना चेति को ग्रहीष्यति बुद्धिमान्॥ 176.

संकल्पप्रभवो रागो द्वेषो मोहश्च कथ्यते इतिवचनात्।

विषयेषु अयोनिशः कल्पना रागादिसिद्धिकारणम्। ततश्च येषां सत्यामेव कल्पनायां अस्तित्वं ध्रुवम् तेषां रज्जुकुण्डलके परिकल्पितसर्पवत् स्वरूपासिद्धिरवसीयते। यस्तु स्वरूपसिद्धिं रागादीनां[५] अभ्युपैति, नियतं तेन कल्पनापेक्ष्यजन्मत्वं स्वरूपसिद्धिविरुद्धं नाभ्युपेतव्यम्॥ यदि ह्यसौ भूतोऽर्थः किमर्थं तदस्तित्वे कल्पनापेक्ष्यते। अथापेक्ष्यते कथमसौ भूतार्थः। इत्येवं सोपपत्तिकागमालोकावभासितचित्तसन्तानत्वान्न विद्वांसः स्वरूपसिद्धस्य कल्पनाजनितत्वमङ्गीकुर्व्वन्ति। जड़ास्तु यथाकथञ्चित् विपर्य्यासात् प्रवर्त्तन्ते ध्यायिशिरःकपाल[६]वत्। कश्चिद्ध्यायी चित्तविभ्रममनुप्राप्तः कपालं मम शिरसि लग्नमिति। तस्य केनचित् अन्यत् कपालं पातितं एतत् तव शिरसः पतितमिति। स च तथेत्यवगम्य स्वस्थो जातः। कल्पनाविगमात्। अत्राह। विद्यत एव रागादीनां स्वभावो बन्धनत्वात्। तथाहि स्त्री पुरुषविषयेण रागेण पुरुषेण सह बद्धा, नातिक्रमति पुरुषम्। पुरुषश्च स्त्रीविषयेण रा[७]गेण, स्त्रिया सह बद्धो न परित्यजति स्त्रियमिति। उच्यते।

कस्यचित् केनचित् सार्द्धं बन्धो नाम न विद्यते।

यथैव हि रागः कल्पनापेक्ष्यजन्मत्वात् स्वभावासिद्धः तद्वत् स्त्रीपुरुषयोरपि स्वरूपासिद्धत्वात् कस्यचिदर्थस्य केनचिदर्थेन सह नास्ति स्वभावतो बन्ध इति। न बन्धकारणत्वात् रागः स्वरूपतः सिध्यति। अथाप्यवधूयेत्थं विचारं परेण सह परस्य बन्धः परिकल्प्यते। ए[८]वमपि

[1] [Leaf 21 of the MS.]

परेण सह बद्धस्य विप्रयोगो न युज्यते ॥ 177.

यदि हि परस्य स्वरूपतो बन्धनकारणत्वं स्यात् तदा स्वरूपस्यान्यथाभावाभावात् मुक्त्यभाव एव स्यात्। विप्रयोगो विमोक्षो विमुक्तिरित्यनर्थान्तरम्। अस्ति च मुक्तिरिति नास्ति स्वरूपतो बन्धनकारणत्वं परस्य। असति बन्धनकारणे कुतो बन्ध इति स्वभावशून्या एव रागादयः स्वभावशून्यतादर्शनात् प्रक्षीयन्त इति शक्यमाख्यातुम्। कृष्णावदातवलीवर्द्दसंयो[२१क]जनवत्। यथा न कृष्णो वलीवर्द्दोऽवदातस्य संयोजनाय, नाप्यवदातः कृष्णस्यापि तु युगरज्जु तथा नेन्द्रियाणि विषयाणां नापि विषया इन्द्रियाणामपि तु योऽत्र च्छन्दरागस्तद्बन्धनमिति। यद्येवं विचारात् क्लेशा निवर्त्तन्ते तत् किमित्यजितक्लेशाः प्रायो दृश्यन्ते। गम्भीरधर्म्माधिमुक्तिविरहात्। तथाहि ॥

अस्मिन् धर्म्मेऽल्पपुण्यस्य सन्देहोऽपि न जायते।
भवः सन्देहमात्रेण जायते जर्ज्जरीकृतः ॥ 178.

अनादिसंसाराभ्यस्तविपर्य्यासमन्दर्शनो ह्यवि[२]द्वान् प्रतिविम्बोपमेषु पदार्थेष्विदंसत्याभिनिविष्टः स्वभावशून्यतोपदेशं प्रपातमिव मन्यते। शून्यविमुक्तिहेतुकुशलविरहितचित्तसन्तानत्वात् तथाविधस्य हि सतस्यास्मिन् शून्यताधर्म्मे किमेवं नैवमिति सन्देहोऽपि न जायतेऽन्यत्र विपरीतनिश्चयात्। ततश्च मुक्तिहेतुविपर्य्यस्तत्वात् कुतोऽस्य मोक्षः। यदि त्वयं केनापि हेतुना शून्यताधर्म्मे उपदिश्यमाने संशयमुत्पादयेत् किमयं धर्म्म एवं नैवमि[३]ति; नियतमस्यानेनापि सन्देहमात्रेण जर्ज्जर एव संसारो जायते। स हि यदैवमित्यवलम्बते सोऽस्याङ्गः क्रमेण क्लेशतस्करोच्छेदाय सम्पद्यते। यदा संशयितो निश्चयेनार्थी सोपपत्तिकागमवलात् सम्यग्दर्शनो निश्चितः क्लेशक्षयाय संसारोच्छेदं करिष्यतीति। सन्देहकालेऽपि जर्ज्जर एवास्य संसारो लक्ष्यते तद्भेदानुकूलावस्थावस्थितत्वात्। राक्षसीगृ[४]हीतवालाहकाश्वराजपरिमोचितवत्। यथा भग्नवाहनः स्वार्थवाहो राक्षसीगृहीतः पतित्वेनोपचर्य्यमाणस्तदा दक्षिणस्या दिशो निवार्य्यमाणो न कदाचित्त्वया दक्षिणा दिक् गन्तव्येति। स सन्दिह्यमानः कस्मादेषा मां वारयतीति गतस्तत्र वालाहकमश्वराजमागम्य तस्याः राक्षस्याः निर्मुक्तः समुद्रपारञ्च संप्राप्तः। यदि चास्य सन्देहो नाभविष्यत् न तस्या [५] राक्षस्या वियुक्तोऽभविष्यत्, न च समुद्रपारं प्राप्तोऽभविष्यत्। यश्चायं स्वभावशून्यतालक्षणो धर्म्मो यस्मिन् सन्देहोऽपि भवस्य जर्ज्जरत्वाय संवर्त्तते, तस्य भगवता प्रथमक्षान्तिक्षणमुपादाय यावत् मोक्षस्तावदपरिहानिर्वृद्धिश्चोपवर्णिता नत्वेवं लौकिकानां धर्म्माणाम्। ते हि विपाकक्षयादपि क्षीयन्ते प्रत्ययवैकल्यादपि न प्रवर्त्तन्ते। न हि प्रज्ञापारमि[६]ताऽनधिष्ठिता दानादयः समर्थाः जात्यन्धा इव सर्व्वज्ञतानगरमनुप्राप्तुमित्युवाच शास्ता। तदेवं ॥

आत्मा ह्यादस्य धर्म्मस्य वृद्धिमेवोक्तवान् मुनिः।
तत्र भक्तिर्न यस्यास्ति सुव्यक्तं बुद्धिमान् न सः ॥ 179.

यो ह्यत्यन्तोपकारिणि धर्म्मे वृद्धिप्रकर्षवति नोत्पादयति भक्तिं, स क्षेमस्थाने भयदर्शित्वात् मूढतामेवात्मनो जड़ः प्रकटयति। तदित्थं मूढता माभून्ममेति [७] विद्वद्भिः स्वभावशून्यतादर्शने भक्तिरास्थेया। शर्करामोदकवत् शलाकामुद्रावच्च। यथा शर्करामोदकः सर्व्वत आस्वाद्यस्तथा। यथा कस्यचित् पुरुषस्य

विद्याद्वयं सिद्धं। तत्रैकया शलाकां परिजप्य सर्व्वस्याक्ष्युपशमनं करोति द्वितीयया मुद्रां दत्वा। अथ तेन कस्यचित् स्निग्धस्योच्यते। गृहाण त्वं एतत् [विद्या]द्वयमुपकारस्ते भविष्यति। तेन न गृहीतम्। अथास्यास्मिन् मृते स्निग्धे महाव्याधिरुत्पन्नः। स चाचिकित्स्यः तेनैव कालगतः। किं पुनरिमे पदार्थाः शून्या एव सन्तः वैराग्यार्थं शून्यवद्दृश्यन्ते; अथ प्रकृत्या एव शून्या इति व्यपदिश्यन्ते इति। उच्यते॥

नाशून्यं शून्यवद्दृष्टं निर्व्वाणं मे भवत्विति॥ 180.

किं कारणं यस्मात्।

मिथ्यादृष्टेन निर्व्वाणं वर्णयन्ति तथागताः॥

अन्यथावस्थितस्य वस्तुनो यदन्यथादर्शनं तन्मिथ्यादर्शनम्। यदि च स्वभावशून्याः सन्तः पदार्थाः स्वभावशून्या इति दृश्येरन् तदा मिथ्याद[२१][१]र्शनादेव निर्व्वाणाधिगमः स्यात्। न च मिथ्यादृष्टेः पुद्गलस्य निर्व्वाणाधिगमं बुद्धा भगवन्तो व्यवस्थापयन्ति। सम्यग्दृष्टिपुरःसरेणैव यथा निर्व्वाणप्राप्तिव्यवस्थापनात्; ततश्च मायावत् प्रतीत्यसमुत्पन्नत्वात् स्वभावशून्या एव सन्तो भावाः शून्याः स्वभावेनेत्यधिगम्यन्ते यथास्थितपदार्थतत्त्वदर्शनावदातसन्तानैः समारोपापवादान्तकल्पनामलामलिनैरार्य्यैः। राज्ञां वेल्लकपेयप्रेषणवत्। कश्चित् वेल्लको गुरुणा [१] राज्ञां पेयस्यार्थमभीक्ष्णं प्रेष्यते। अथ कदाचित् स तेनोच्यते। नैतत् कल्पते भिक्षूणां कथं त्वं पिबसीति। स प्राह पानीयमिति। तेनाप्यन्यस्मिन्नहनि पानीयमेवानीतं। स प्राह। कस्मादन्यदेवमानीतमिति। श्रामणेरः कथयति। यदा त्वं पानीयमेवेति कृत्वा पिबसि तत् कोऽत्र विशेष इति। यदि खलु स्वभावशून्या एव पदार्थाः किमर्थमविद्यादिना क्रमेण सत्वभाजनलोकस्य प्रवृत्तिरुपदिश्यते। [२] ननु स्वभावपरमार्थत्वात् स्वभावशून्यतैव केवलमुपदेष्टव्येति। नैतदेवम्। नैव हि लौकिकं प्रवृत्त्यात्मकम् परमार्थं पूर्व्वं सदुपदिश्य शक्यं स्वभावशून्यतालक्षणतत्त्वमादर्शयितुमिति। तत्त्वावतारसोपानभूतत्वात् प्रवृत्त्युपदेशोऽपि कर्त्तव्यः। सर्व्वसङ्गपरित्यागेन निवृत्तिसुखावाप्तिनिमित्तं स्वभावशून्यतोपदेशोऽपि कर्त्तव्यस्तदत्र तााथागते प्रवचने।

लौकिकी देश[४]ना यत्र प्रवृत्तिस्तत्र वर्ण्यते॥

परमार्थकथा यत्र निवृत्तिस्तत्र वर्ण्यते। 181.

यत्र संसारप्रवृत्तिक्रमोऽविद्यासंस्कारादिना क्रमेणाहेत्वेकहेतुविषमहेतुविनाशार्थं स्वसामान्यलक्षणसंज्ञावकल्पनया देश्यते; ज्ञातव्यं विदुषा प्रवृत्तिस्तत्र वर्ण्यत इति। यत्र तु प्रतीत्यसमुत्पादस्य स्वभावानुत्पादस्वभावशून्यतोपदिश्यते; तत्र संसारप्रवृत्तेर्निवृत्तिर्वर्ण्यते। स्वभावशू[५]न्यतापरमार्थावगमात् सर्व्वत्रासङ्गवतो वेदनास्वतृष्णस्य तृष्णाप्रत्ययो यानादिकारणनिरोधेन जातिजरामरणादेः सर्व्वथा निरोधात्। विलप्रवेशवत्। यथा विलप्रवेशे सा काचिदुपकरणप्रवृत्तिः: सर्व्वासावुत्क्रष्टव्या न तया किञ्चित्प्रयोजनं क्रियते। तथा सर्व्वा लौकिक्यः प्रवृत्तयो निस्साराः परित्यक्तव्या विदुषा यस्मात् प्रवृत्तिधर्म्म इति। यद्येवं [६] परमार्थकथायां न किञ्चिदस्ति। शून्यत्वात् सर्व्वभावानां तदा सर्व्वाभावः प्रसज्यते। सर्व्वा-

[1] [Leaf 19 of the MS.]

भावाच्च न किञ्चित्कर्त्तव्यं स्यात् । कर्त्तृकर्म्मक्रियादीनां सर्व्वथाभावात् । अभावाच्च क्रियादीनां न स्यात् मोक्षः इत्यतः सर्व्वमेवायुक्तमित्युच्यते ।

किं करिष्याम्यसत्सर्व्वमिति ते जायते भयम् ॥ 181.

विद्यते यदि कर्त्तव्यं नायं धर्म्मो निवर्त्तकः ।

यत एव हि सर्व्वमसत् अत एवायं प[७]रमार्थधर्म्मः प्रवृत्तिनिवर्त्तको युज्यते । तत्किमिति निवृत्त्यर्थी सर्व्वाभावं क्रियाद्यनधिष्ठानञ्च समीहते । अथ हि नामात्रापि प्रवृत्ताविव कर्त्तव्यं स्यात् तदा क्रियाफलस्यापि परार्थस्य प्रवृत्तेः सैव प्रवृत्तिरिति कथमयं धर्म्मो निर्व्वाणावाहकः स्यात् । मृगतृष्णावत् । यथा हि मृगतृष्णिका पानीयसंज्ञां जनयति न च तत्पानीयं भवति । यस्य तु तत्र परितर्षो जायते स तत्रैवानर्थं समापद्यते । तथा स्कन्धेष्वा[८]त्मसंज्ञा । यतस्तु निवर्त्तके धर्म्मे न किञ्चित् कर्म्मास्ति तस्मात् शून्यपक्षः श्रेयानिति । यस्तु शून्यतामार्गे रज्यति । विपरीते स स्वभावपक्षे दुष्यति तमुपालभते ।

स्वपक्षे विद्यते रागः परपक्षस्तु तेऽप्रियः ॥ 182 B.

न गमिष्यसि निर्व्वाणं न शिवं द्वन्द्वचारिणः । 183 A.

द्विविधो हि पक्षः समासतः स्वपक्षः परपक्षश्च । तत्र यदि स्वपक्षे ते रागोऽस्ति शून्यपक्षः श्रेयानिति, परपक्षश्च ते मिथ्ये[१८क]ति कृत्वाऽप्रियः । न गमिष्यसि निर्व्वाणम् । न ह्यत्र नयप्रतिघहतस्य. द्वन्द्वचारिणो निर्व्वाणमस्ति । सर्व्वत्र हि उदासीनाः सङ्गच्छेदादनपायसुखैकरसं शिवमाप्नुवन्ति । आचार्य्यसंघसेनवटुवत् । कश्चिद्वटुराचार्य्यसंघसेनात् शास्त्रं शुश्रूषति । स कदाचित्तेनोक्तं(?) उपासको भवेति । सोऽप्यन्यतमस्मिन्नहनि तमाचार्य्यमुवाचाचार्य्य उपासकोऽहं संवृत्तः । किं कारणं इति । ब्राह्मणान् दृष्ट्वा घातयितुमिच्छामीति । अत्राह । यद्यपि नि[१]र्व्वाणं परमसुखं सकलोपद्रवरहितत्वात् । तथापि तदशक्यं प्राप्तुम् । तत्प्राप्त्युपायस्यातिदुःकरत्वात् । भवस्त्वयत्नसाध्यत्वात् यस्मात् सुखेन प्राप्यते । तस्मात् तत्र न प्रवृत्तिरिति । उच्यते । विपरीतमवधारितं यस्मात् ।

अकुर्व्वाणस्य निर्व्वाणं कुर्व्वाणस्य पुनर्भवः ॥ 183 B.

निश्चिन्तेन सुखं प्राप्तुं निर्व्वाणं तेन नेतरः । 184 A.

कुशलाधिक्रियासु निरस्तव्यापारेण निश्चिन्तेन निर्व्वाणमवाप्यते । तस्मात् सुखं प्राप्तुं निर्व्वाणम् । कुशला[२]कुशलादिप्रवृत्तिसाध्यत्वात् तु निर्व्वाणादितरः पुनर्भवो न सुखेन प्राप्यते, न विदुषोऽप्रयत्नलभ्यं निर्व्वाणमवधूय युक्तं विविधव्यापारपरिखेदलभ्यं पुनर्भवमर्थयितुम् । आरोग्यबलसाधनवत् । बहवो ह्यरोगस्य बलसाधनाय दृश्यन्ते प्रत्ययाः । यदा तु नेच्छन्ति किञ्चिदपि विशेषं तदा सर्व्वैः प्रत्ययैरनर्थी भवति । यदि खल्वकुर्व्वाणस्य निर्व्वाणं तत् किमर्थं त्व[४]याच शास्त्रे अनित्याद्यर्थप्रतिपादनं क्रियते । संसारभुक्तं जगत्संसारादुद्वेजनार्थं । तथा हि ॥

उद्वेगो यस्य नास्तीह भक्तिस्तस्य कुतः शिवे ॥ 184 B.

निर्गमश्च भवादस्मात् स्वगृहादिव दुष्करः ।

संसारादुद्विग्नचेतास्तन्निःसारताय निर्व्वाणं भजते । यस्य तु नास्त्युद्वेगः स किमिति तदर्थयते ।

तदुद्वेगाभावादेव च भवान्निर्गन्तुं अल्पबुद्धयो नोत्सहन्ते। यथा स्व[५]गृहमल्पसारमपि व्यासङ्गपरिच्छेदस्य दुःकरत्वात् न त्यक्तुं पार्य्यते। तादृशमेतत्। बध्ययानप्रार्थनवत्। बध्यः कश्चिद् बधायोत्सृष्टः सद्यो हन्तव्य इति। स च यानं प्रार्थयते स्म। एवमत्र भवगतानामपीच्छा न निवर्त्तते। अपि तु। विषयसुखसम्भोगसुलभानि गृहाणि त्यक्तुमाद्यानां मा भूत् तत्सामर्थ्यान्निर्व्वाणं च गन्तुम्। येषान्तु व्याधिदारिद्र्यादीनां दुःखहेतूनां प्रतिविधानास[६]म्भवस्तेषां युक्त एव संसारपरित्यागः। तथा हि ॥

दुःखाभिभूता दृश्यन्ते केचित् मरणकाङ्क्षिणः ॥ 185.

ते तदा केवलं मोहान्न गच्छन्ति परं पदम् । 186 A.

व्याधिविप्रयोगदुःखान्विताः केचिदात्मस्नेहमपास्यातटादप्यात्मानं उत्सृजन्ति। तथैव यदि संसारं दुःखतो निवार्य्यात्मस्नेहमत्यन्ताय उद्धरेयुरदूरे निर्वृतिसुखस्य वर्त्तेरन्। विपर्य्यासितदर्शनास्तु मो[७]हात्तथा न प्रवर्त्तन्ते ये निर्व्वाणं नासादयन्ति। पेयापीतश[ो]यितवत् पेयौषधसंन्देहवच्च। कश्चित् पेयान् पीत्वा शयितः स भूयस्या मात्रया दुःखी संवृत्तः; तथा बाला यथा यथा सुखं प्रार्थयन्ते तथा तथा दुःखिततमा भवन्ति। यथा कश्चिदौषधं पास्यामीति उपस्निग्धः स चोपस्नेहात् सन्दिग्धो जातः किमौषधं पेयं कतमद्वा पेयमिति स व्याधेर्न मुक्तः। तथा सर्व्वबालपृथग्जनाः दुःखोपद्रवस्नेह[८]द्रवीकृतक्लेशा अपि सन्तः अज्ञानव्याधिविनाशाय विरागौषधपानसन्दिग्धाः क्लेषौषधमपीत्वा सर्व्वक्लेशव्याधिनिर्म्मोचात् परं पदं नाधिगच्छन्ति। अत्राह। यद्येवं सर्व्वपरित्यागेन निर्व्वाणमेवार्थनीयं तत्प्राप्तये भावनाकथैवास्तु तत्किमर्थं भगवता दानशीलकथे अपि विहिते इति उच्यते। त्रिविधो हि सत्त्वधातुः हीनमध्यमोत्तमभेदात् तद्भेदार्थं भगवतो देशनावैचित्र्यम्। [१९]

[1]स्य विधेयः ॥ बालदारकवत् ॥ यथा बालदारको नान्यया भाषया शक्यते बोधयितुम्, तथा पृथक्जनो लोकः। अतएव लोकावतारोपायत्वात् सदसदादिदेशनानां, भगवता।

सदसत् सदसच्चेति नोभयं चेति कथ्यते। 192.

सर्व्वाभाववदर्शनमलक्षालनाय सदिति कथितम्। भावाभिनिवेशप्रहाणायासदिति कथितम्। उभयाकारदर्शनत्यागाय सदसदित्यावेदितम्। सर्व्वाकारप्रपञ्चोच्छेदाय नोभयमिति प्रकाशितम्। अपि च त्वमेव तावद्विचारय। [२]

ननु व्याधिवशात् पथ्यमौषधं नाम जायते।

व्याधयः प्रतिविधातव्याः। तेषां च निदानभेदादनेकमौषधं नैकमेव सर्व्वत्रोपयुज्यते। तादृशमेतत्। यक्षप्रेतप्रव्रजितधर्म्मपानीयदानवत् यक्षप्रत्यवस्थितदर्शनवच्च। यथा त्रयो भ्रातरः, तत्रैकः प्रव्रजितः, द्वितीयो यक्षः सम्वृत्तः महर्द्धिकः, तृतीयः प्रेतः संजात उल्कामुखः, तावुभावपि तस्य भिक्षोः सकाशं गतौ। ततः तेन भिक्षुणा तस्य यक्षस्य मदहेतुज्ञापनार्थं दौः[३]शील्यदोष उद्भावितः प्रेतस्य तु पानीयप्रदानेन ज्वलनदुःसहदुःखमुपशमय्य दुःखहेतुज्ञापनार्थं मात्सर्य्यदोषो ज्ञापितः। एवं सत्वाशयवैचित्र्यात् धर्म्मदेशनावैचित्र्यं भवति। यथा कस्यचित् पित्रा कन्यका देशान्तरे याचिता। स चास्य पिता कालगतः स मात्रोच्यते। गच्छ तां कन्यकामवलोकयितुं, तत्र पितृवयस्यो यक्ष एवंनामा तमर्थयस्वेति। तेन तथाकृतं। अथ स यक्षः तं विमा[४]नेन वैहायसं गृहीत्वा गतः। पुरुषश्चाभ्यागच्छति। स तेन यक्षेण पुत्र उक्तो गच्छैनं त्रासयस्वेति। तेन तथाकृतं। आगत्यैनं पृच्छति, किमर्थं चैष पुरुषः त्रासितइति। स प्राह, एष प्रव्रजितो नाहमस्य तेजः सहे। अथ तेन तं नगरं नीत्वा स पुत्र एकान्ते स्थापितः। तत्कन्यान्वेषणार्थं नगरं प्रविष्टः। तस्य च यक्षस्य तां कन्यकां दृष्ट्वा रागः समुत्पन्नः, सा तेन गृहीता, स च पुत्रः चिरम[५]सौ किं करोतीति स्वयं गतो यावत्तेनैव गृहीतां दृष्ट्वा स तेनैव विज्ञप्यते। मुञ्चैनां कन्यकां स्नुषा ते भवतीति। धर्म्मदेशनापि तद्वत् ज्ञेया। आसां च सदसदादिदेशनानामध्यात्मचिन्ताऽप्रवृत्तत्वात्। येषा नोभयदेशना एषा परमार्थदेशना तस्मिंश्च परमार्थे।

सम्यग्दृष्टे परं स्थानं किंचिद्दृष्टे शुभा गतिः।
तस्मादध्यात्मचिन्तायां कार्य्या नित्यं मतिर्बुधैः॥ 193.

परमार्थज्ञानेन [६] खलु सम्यग्दृष्टे परमार्थे परं स्थानं प्राप्यते निर्व्वाणम्। ईषत् किञ्चित् दृष्टे शुभा देवमनुष्यगति र्भवति। यस्माच्च सम्पूर्णज्ञानदर्शने निर्व्वाणं प्राप्यते। असमाप्ते च शुभा गतिः। तस्मादध्यात्मचिन्तायां विदुषा नित्यमेव बुद्धिः कर्त्तव्येति। इभ्यकुलचौरासद्धर्म्मनिमन्त्रणवत्। कश्चित् चौरोऽभीक्ष्णं विहारं गच्छति स्म। स केनचित् भिक्षुणोक्तः प्राभृतमस्मत्तः प्रतिगृहाणेति। स [७] प्राह कीदृशं प्राभृतम्, भिक्षुरुवाच। धर्म्मप्राभृतम् शिक्षापदं गृहाणेति। स प्राह। प्राणातिपातादत्तादानमृषावादेभ्यो विरक्तुं न शक्यं किन्तु काममिथ्याचाराद्विरमामीति। स ततो विरम्य राजकुलं चौर्य्याय प्रविष्टः। तत्र चासद्धर्म्मेण

---

[1] [Leaf 22 of the MS.]

यथाबीजस्य दृष्टोऽन्तो न [७] चादिस्तस्य विद्यते ।
तथा कारणवैकल्यात् जन्मनोऽपि न सम्भवः ॥ 197.

यथा नाम चिरकालप्रवृत्तस्यास्य हेतुफलपरम्परया प्रवर्त्तमानस्य बीजसन्तानस्यानादिमतोऽन्तो दृष्टः, अग्निदाहात्, तथानादिकालप्रवृत्तस्य परम्परया हेतुतः प्रवर्त्तमानस्यानादिमतोऽपि विज्ञानबीजजन्मनः कारणवैकल्यात् पुनः सम्भवो नास्ति । क्लेशापेक्षं हि कर्म्म जन्माक्षेप्तुं पर्य्याप्तम् । ते च क्लेशा ज्ञानतेजःस्पर्शादभावं गतास्तदयमसमर्थः कर्म्मसहायाभावाद् जन्माक्षेप्तुं एवमयमवसितजन्मामौति भवति दीपवत्, भृष्टतिलवत्, विहायसपरिव्राजकवत्, वृक्षवच्च । यथा दीपस्य प्रत्ययेषु असत्सु स्थितिर्न भवति सत्सु भवति । यथा भृष्टानां तिलानां विरोहणन्न भवति । विहायसपरिव्राजको मनःशिलां साधयित्वा तद्धेतोर्विहायसा गच्छति स्म ; यदा तु सान्येन पुरुषेण विद्यापहृता त[१२] [1]दा हेत्वभावात् पतितः । यथा च वृक्षस्य मूलोत्पाटनान्न पुनर्वृद्धिर्भवति हेत्वभावात् । तथा भावाभिनिवेशहेत्वभावात् न रागादीनां क्लेशानामुत्पत्तिर्भवति । न च कर्म्मवशात् बोधिसत्त्वानां प्रवृत्तिरपि तु प्रणिधानवशात् । तस्मात् सर्व्वगतिभावदर्शित्वेन परमदुःकरतमसत्यद्भुतं बोधिसत्त्वस्य यत् सत्त्वार्थे घटते ; सत्त्वं च नाभिनिविशते किञ्चिदिति । उक्तं चाचार्य्यबुद्धपालितेन ।

पश्यन्नपि जगच्छून्यं जन्मदुःखनुनुत्सया । [२]
सुचिरं यदसि क्लिष्टस्तन्नाम परमाद्भुतम् ॥

तच्च सर्व्वजगत्स्वभावदर्शित्वं यथा भवति । तथोत्तरत्र प्रकरणैरष्टाभिः प्रतिपादयिष्यति ।

## आचार्य्यार्य्यदेवीये बोधिसत्त्वयोगाचारे चतुःशतके पारिकर्म्मिकप्रकरणमष्टमम् ।

समनुक्रान्तप्रकरणजलप्रक्षालितचित्तसन्तानस्य तत्त्वामृतदेशनापात्रस्य शिष्यस्याचार्य्योऽतः परमवशिष्टैः प्रकरणैः यथास्थितपदार्थतत्त्वा[३]धिगमाय तत्त्वविनिश्चयमारब्धुकामः संस्कृतस्योदयव्ययत्वेनासारतामुद्भावयन्नाह ॥

सर्व्वं कार्य्यार्थमुत्पन्नं तेन नित्यं न विद्यते । 198 A.

कार्य्यार्था हि प्रवृत्तिः लोके न स्वाभाविकी । तथाचाहु र्लौकिकाः कार्य्यकृतोऽयमस्य स्नेहो न स्वाभाविक इति । संस्कृतस्य च भूतभौतिकचित्तचैत्तलक्ष्यलक्षणादेरेकस्यैकस्योदयाभावात् यथासम्भवं कलाप[४]रूपस्यैवोत्पादः । तस्य कलापस्य मिथःकार्य्यकारणावस्थानात् । यस्मिन् सति यद्भवति, यदभावे च यन्न भवति तत्तस्य कारणं इतरत् कार्य्यमिति । पृथिवीमन्तरेण भूतत्रयस्याभावात् । सत्याञ्च भावाद्भवति कार्य्यप्रयोजना पृथिव्याः समुत्पत्तिरित्येवं सर्व्वमेव संस्कृतम् यथास्वं कार्य्यार्थमुत्पन्नम् । यच्च कार्य्यार्थमुत्पन्नन्न तत् नित्यम् । नि[५]त्यशब्दस्य स्वभावसत्यसारवस्तुद्रव्यपर्य्यायत्वात् । तदभावेन, निःस्वभावमसत्यमसारमवस्त्वद्रव्यमसंस्कृतमिति गण्यते । अतएवोक्तं भगवता चक्षुः समृद्धे शून्यमात्मना आत्मीयेन च नित्येन

[1] [Leaf 34 of the MS.]

ध्रुवेण शाश्वतेनाविपरिणामधर्म्मणेति । तथा चक्षुः चक्षुषा शून्यं अकूटस्थाविनाशितामुपादाय । तत्कस्य हेतोः प्रकृतिरस्यैषेति [६] अतएव तन्मृषा मोषधर्म्मकं यदेतत् संस्कृतमित्युवाच शास्ता । एतच्च वचनम् वक्ष्यमाणयुक्त्युपेतं, तन्निश्चित्याचार्य्य आह ॥

तस्मान्मुनिमृते नास्ति यथाभावस्तथागतः ॥ 198 B.

अशैक्ष्यकायवाङ्मनोमौनयोगान्मुनिर्बुद्धो भगवान् । स एवानित्यशून्यतोपदेशेन यथा भावानां स्वभावस्तथागतो बुद्धस्तथागत इत्युच्यते नान्यो विपरीततत्त्वोपदे[७]शेन यथास्थिततत्त्वार्थानभिसम्बोधात् यथाचोक्तम् ।

अतीता तथता यद्वत् प्रत्युत्पन्नाप्यनागता ।

सर्व्वधर्म्मास्तथा दृष्टाः तेनोक्तः स तथागतः इति ॥

अथवायमन्योर्थः । यत् समुदयधर्म्मि तद्वश्यं निरोधधर्म्मि जातिप्रत्ययं जरामरणमिति चोपदेशात् । यदुत्पन्नं तस्य कार्य्यं विनाश एव तदर्थत्वादुत्पादस्येत्यतः सर्व्वंकार्य्यार्थमुत्पन्नम् । तेन नित्यं न विद्यते स्वभावो न वि[८]द्यत इत्यर्थः । यत एतदेवं तस्मात् मुनिमृतेनास्ति यथा भावस्तथागतः । अस्यार्थः पूर्व्ववत् । अथवा वेदनाचयवेदनीयकर्म्मणां कालदेशावस्थाविशेषसंवेद्यानां तैर्विना कर्म्मफलसंवेदनाभावात् तदर्थमाध्यात्मिकं वाह्यम्वा वस्तु सम्भवात् सर्व्वं कार्य्यार्थमुत्पन्नम् न स्वरूपत एव व्यवस्थितम् तेन नित्यं न विद्यते । यदि हि तत् स्वरूपतो व्यवस्थितं स्यात् स्वरूपस्यानपायित्वा [२४क] न्नित्यमेव स्यात् । न च तथास्तीति । तेन नित्यं न विद्यते । स्वभावशून्यं सर्व्वमित्यर्थः । सा चेयं शून्यता तथागतेतरशास्तृप्रवचनानुपदिष्टा इत्याह । तस्मान्मुनिमृतेनास्ति यथाभावस्तथागत इति । तार्किकास्तु व्याचक्षते । परेण यत् कार्य्यार्थमनुत्पन्नत्वेनाभ्युपगतं तदुत्पन्नं कार्य्यार्थत्वादुत्पन्नकार्य्यार्थवदिति । तदचानुदयव्ययवताम् परिकल्पितानां पृथिव्यादिपरमाणूनां खपुष्पादिवत् तावदस्तित्वमा[२]स्यातुमशक्यम् । न चाविद्यमानानां कारणत्वमारोप्य उत्पादसिद्ध्याऽनित्यत्वसाधनं न्याय्यं । कार्य्यार्थत्वस्य स्वतएवासिद्धत्वात् प्रसिद्धहेत्वङ्गीकरणे चातिप्रसङ्गात् अयुक्तवस्त्वभ्युपगमाच्च परस्य निवारणीयत्वान्न युक्तं नित्यं कार्य्यार्थत्वेनाभ्युपगन्तुं । न चानेन परप्रतिज्ञाया अनुमानविरोधोद्भावनं न्याय्यम् । तस्योभयप्रसिद्धेनैवोद्भावनात् । यस्यापि स्वोभयप्रसिद्धे [३] नानुमानबाधासम्भवात् स्वप्रसिद्धेनाप्यस्ति अनुमानबाधेति नूनं तस्याप्यर्थप्रतिपादनाकौशलमेव स्यात् । न हि विद्वान् सुखप्रतिपाद्यमर्थं दुःखेन प्रतिपादयितुमाद्रियते । अपि चाकाशस्यापि चक्षुर्विज्ञानाङ्कुरोत्पत्तौ कारणत्वाभिधानात् सूत्रान्ते षट्धातुपाठाच्च पुद्गलप्रज्ञप्तिनिमित्तत्वादनैकान्तिकत्वमेव स्यात् [४] कार्य्यार्थत्वस्य ।

कारणं विकृतिं गच्छत् जायतेऽन्यस्य कारणमिति ।

न्यायात् नास्त्याकाशस्य कारणत्वमिति चेन्नैतदेवम् तत्र हि क्रियते येन तत् कारणमिति जनक एव हेतुरभिसमीहितः कारणत्वेनाङ्कुरस्येव वीजं । निमित्तभावमात्रेण त्वाकाशस्यापीष्यत एव कारणत्वमेवं त्वनिष्यमाणे सूत्रशास्त्रयोरविरोधो नोद्भावितः [५] स्यात् । न चाचार्य्यः सर्व्वथा निःस्वभावभाववादित्वात् हि उत्पत्तिसुखेनानित्यतां प्रतिपादयति । तत्त्वाधिकारात् उत्तरत्र तस्या अपि नित्यतावत् प्रतिषिध्यमानत्वात् । वक्ष्यति हि ।

"उत्पादस्थितिभङ्गानां युगपन्नास्ति सम्भवः ।
क्रमशः सम्भवो नास्ति सम्भवो विद्यते कदेति ॥"

शास्त्रेपि चोक्तं अनित्ये नित्यमित्येवं यदि ग्राह्यो विप[६]र्य्ययः ।
अनित्यमित्यपि ग्राहः शून्ये किन्न विपर्य्यय इति ॥

अपिच वस्तुनो लोकसिद्धत्वात् तत्सिद्धावनुमानपरिग्रहो निःप्रयोजन एव । योऽप्यवस्तुनो वस्तुसत्तां मौढ्यात् प्रतिपद्यते सोऽपि सामान्यजनप्रसिध्या शक्यत एव विवचितमर्थं ग्राहयितुं । वस्तुतत्त्वसाधने चावयवचितयस्यापि साध्यवदसिद्धत्वादसम्भव एतार्थ[७]साधनस्येत्यतस्तार्किकानां व्यर्थ एव तर्कप्रणयनश्रमो लक्ष्यते । तथाच लौकिका अनधीततर्कलक्षणा अपि सन्तो लौकिकार्थनिश्चयनिपुणा यद्यथास्थितं वस्तु तत् तथैव प्रतिपद्यन्ते प्रतिपादयन्ति चापरेभ्यः । अपि चानित्यताया लोकप्रतीतत्वात् यत्र लोकोपि तामवस्यति तत्र न शक्यत एव तदर्कुं विपरीतार्थाभिधायी तथागत एवेति । यस्तु खलक्षणमारोप्य लोको नित्यतां प्रतिपद्यमानः तस्य वस्तुनो स्वं न षामोषधर्म्मकत्वेनाप्रतिपत्तेः सर्व्वत्र तथागत एवाविपरीतदर्शीति युक्तं । अत्राकुरेके । सत्यं यत् कार्य्यार्थमुत्पन्नम् न तत् नित्यं भवतीति । ये तूभयाङ्गविकलाः पदार्थास्तद्यथाकाशादयो मनःपर्य्यन्ताः ; येपि चैकाङ्गविकलाः पदार्थाः तद्यथा पृथिव्यादिपरमाणवस्ते नित्या भविष्यन्ति । तेषाञ्चास्तित्वनित्यत्वानवगमान्नाविपरीतदर्शी तथागत इति । तेषां मतस्यायुक्ततामुद्भावयन्नाहाचार्य्यः ॥ [३ ४]

[1]अप्रतीत्यास्तिता नास्तीति । यथास्वं हेतुप्रत्ययायत्तोदयानां सुखादीनां अस्तित्वमुपलभ्य कथमयमर्थापत्त्याऽप्रतीत्यसमुत्पन्नानां नास्तित्वं न प्रतिपाद्येत । अर्हन्नेवायं स्फुटतरमेषां गगनोत्पलादीनामिवासत्त्वं प्रतिपत्तुं । तच्चेन्न प्रतिपद्यते नियतमस्य तैमिरिकस्येव समारोपकृतं दर्शनवैकृतं उपलक्ष्यत इति अतोऽप्रतीत्यास्तिता नास्ति । स चैष न्यायः कालवस्तुदेशभेदभिन्ने पदार्थे सर्व्वत्राव्यभिचारी आह [२] कदाचित् कस्यचिदिति । यतश्चैतदेवं ॥

न कदाचित् क्वचित् कश्चित् विद्यते तेन शाश्वतः ॥

पूर्व्वार्द्धेन सिद्धस्यैतन्निगमनं । यदा चैवमप्रतीत्यसमुत्पन्नत्वात् परिकल्पितानां पदार्थानां सत्वनित्यत्वेन तदा सिद्धं तथागतस्याविपरीतदर्शित्वं तथाहि तेन सच्च सतो ज्ञातं यत् प्रतीत्यसमुत्पन्नं । असच्चासतः परपरिकल्पितमप्रतीत्यसमुत्पन्नं चेति । येपिच सर्गप्रलययोराविर्भावतिरोभावमात्रेण महदादेरभू[३]त्वाभावतिरस्कारेणाभिव्यक्तिमात्रतया नित्यतां प्रतिपन्ना न कस्यचित् प्रतीत्योदयमिच्छन्ति तेऽप्युक्तदूषणं नातिवर्त्तन्ते । अथ स्यात्, सुखादयस्तावत् प्रतीत्यसमुत्पन्नाः सन्ति । तेषां च समवायिकारणमात्मा न चासतः समवायिकारणत्वं न्याय्यमित्यतस्तत्कार्योपलम्भादस्ति तावदात्मा । स चैष नित्यः सदाकारणत्वात् । यदस्ति न चास्य कारणमुपलभ्यते तन्नित्यं [४] । सति चात्मनि तज्जातीया अपि पदार्था भविष्यन्तीति । अत्रोच्यते । स्युस्तज्जातीयाः पदार्थाः यद्यात्मैव स्यात् । नत्वस्ति । कथं कृत्वा ; यस्मात्, न विना हेतुना भावः, भावः स्वभाव आत्मेति पर्य्यायाः । स विना हेतुना न सम्भवति । तथाहि परेणैवास्याकारणत्वमभ्युपेतं तस्य निर्हेतुकं खरविषाणादिवन्नास्तीति सिद्धम् । आकाशादिभिरनैकान्तिकतेति चे[५]त्

[1] [Leaf 38 of the MS.]

तेषामपि तदर्देवास्तित्वस्य निषिध्यमानत्वात्। अथैवं दोषपरिजिहीर्षयाभ्युपेतविरुद्धमपि हेतुमत्त्वमङ्गीक्रियते। एवमप्यसत्।

दृश्यते नित्यत्वं यस्मात् हेतुमान्नास्ति शाश्वतः। 199.

हेतुमत्त्वात् सुखादिवदित्यभिप्रायः। यत एतदेवं।

तेनाकारणतः सिद्धिः, सिद्धिर्नैत्याह तत्त्ववित् ॥ 200 B.

उक्तं हि भगवता

प्रतीत्य धर्मानधिमुच्यते विदू, न चान्तदृष्टी, स करोति निश्रयं ॥

स [६] हेतुप्रत्यय जानती अहेतुप्रत्यय नास्ति धर्मतेति ॥

अस्या देशनाया यथोपवर्णितोपपत्त्यनुगमाद्विपरीतार्थवित्तथागत एवेति सिद्धं। अथ स्यात् घटसुखादेः कृतकस्यार्थस्यानित्यत्वमुपलभ्यार्थापत्त्याऽकृतकस्याकाशादेर्नित्यत्वं भविष्यतीत्येतदप्ययुक्तं। यस्मादेवमिष्यमाणे कृतकस्य घटसुखादेरस्तित्वमुपलभ्य, तद्विपर्ययेणार्थापत्त्याऽकृत[७]कस्यात्मादेर्नास्तित्वमापन्नमिति। तदेव प्रतिपादयन्नाह ॥

अनित्यं कृतकं दृष्ट्वा शाश्वतोऽकृतको यदि।

कृतकस्यास्तितां दृष्ट्वा नास्ति तेनास्तु शाश्वतः ॥ 201.

न चाविद्यमानस्य नित्यत्वं नापि सदैवानित्यं वस्तु। अथ स्यादाकाशाप्रतिसंख्यानिरोधप्रतिसंख्यानिरोधानां अभिधर्मशास्त्रपरिपठितानां अकृतकानां सतां नित्यत्वास्तित्वेनाभ्युपगमादकृतकस्यासत्त्वप्रतिपादनमभ्युपेतेन बाध्यते इ[८]त्येतदपि नास्ति यस्मात् ॥

आकाशादीनि कल्प्यन्ते नित्यानीति पृथग्जनैः।

लौकिकेनापि तेष्वर्थान्न पश्यन्ति विचक्षणाः ॥ 202

रूपाभावमात्र एवाकाशव्यवहारान्न किञ्चनाकाशं नाम वस्तुरूपमस्ति। रूपान्तराभावे तु रूपिणामुत्पत्तिप्रतिबन्धाभावात्; स एव रूपान्तराभावो भृशमस्यान्तः काशन्ते भावा इत्याकाशमित्याख्यातः। तदस्यावस्तुसतोऽकिंचनस्य नामधेयमात्रोपदेशव्यामूढैरभिधर्मशा[२८क]स्त्रे वैभाषिकैर्यद्वस्तुत्वमारोपितं न तत् प्रमाणमिति न तेनास्माकं अभ्युपगमबाधाचोदनं न्याय्यं। तथाहि, पदार्थस्वभावपण्डिता आकाशाभिधाने प्रयुज्यमाने, लौकिकेनापि ज्ञानेनाभिधेयं नाम [न] किंचित् स्वरूपमुपलभन्ते यथा पृथिव्याद्यभिधानेषु काठिन्यादिकं। किमुत पदार्थस्वभावज्ञानावस्थाः सर्वं बाह्यं चाध्यात्मिकं च वस्त्वनुपलभमानास्तस्य स्वरूपमुपलप्स्यन्त इत्येवमप्रतिसंख्यानिरोधप्रतिसं[१]ख्यानिरोधयोरपि वक्तव्यं। नित्यत्वं तेषामकिंचनत्वेनानन्यथाभावाभावमात्रद्योतकं न विधानमित्यतो नास्त्याकाशादीनां नित्यत्वमिति। अत्राह नित्यमेवाकाशं विभुत्वात्। यदनित्यन्न तद्विभुः। तद्यथा घट इति। अत्रोच्यते। यद्यप्यजातस्यासत्त्वप्रतिपादनेन तदधिकरणसर्वाधियासम्भवोऽप्यर्थादुपपादितस्तथापि परमतप्रसिद्धपदार्थस्वरूपविशेषापाकरणमुखेन [२] तन्मतस्यायुक्ततामुद्भिभावयिषुः आकाशस्य विभुत्वप्रतिषेधेन नित्यतामपाकर्तुकाम आह ॥

प्रदेशिनि न सर्व्वस्मिन् प्रदेशो नाम वर्त्तते ।
तस्मात् सुव्यक्तमन्योपि प्रदेशोस्ति प्रदेशिनि ॥ 203.

आकाशस्य येऽवयवास्तेऽस्य प्रदेशाः, तैः प्रदेशस्याकाशं तस्मिन् योऽन्यसंयोगी प्रदेशः स तदितरसंयोगिनि प्रदेशे वर्त्तते । यदि हि वर्त्तेत तदा [४] तेनाभिन्नदेशस्यापि घटस्य सर्व्वगतत्वं स्यात्; न चैतदस्तीत्ययुक्तमेतत् । अपिच यदि प्रदेशोपि सर्व्वत्र वर्त्तेत सोऽपि व्यापित्वात् प्रदेशिवत् प्रदेशाभिधानभाग्न स्यात् । प्रदेशाभावाच्च प्रदेशिनोप्यभावः स्यात् । अथैतद्दोषपरिजिहीर्षया प्रदेशिनि [न] सर्व्वस्मिन् प्रदेशो नाम वर्त्तेत इत्यभिमतं । तदावश्यं सुव्यक्तमन्योपि प्रदे[५]शोस्ति प्रदेशिनीत्यभ्युपेयं । ततश्चासर्व्वगतप्रदेशवतः आकाशस्य प्रदेशिनो घटादिवत् विभुत्वमवहीयेत । न च परस्पराव्यतिभिन्नप्रदेशमात्रव्यतिरेकेण प्रदेशी नाम कश्चिदुपलभ्यत इति कुतोऽस्यासिद्धसत्ताकस्य नित्यत्वमिति न नित्यमाकाशं । अथाप्यस्य निरवयवत्वात् प्रदेशित्वं नाभ्युपेयते । नन्वेवं स[६]ति घटादीनां तेन न संयोगोपि स्यात् । स हि तेषां संयोगः सर्व्वात्मना वा स्यादेकदेशेन वा । न तावत् सर्व्वात्मना, घटादीनामपि प्रत्येकं सर्व्वगतत्वप्रसङ्गात् । तस्मादवश्यं प्रदेशसंयोगिनो घटादय इत्यभ्युपेयं । तथाचाभ्युपगच्छतो नियतमयं यथोक्तो दोषो न नापद्यते । यथोक्तदोषप्रसङ्गाच्च न नि[७]त्यमाकाशमिति ।

कालवादी तु मन्यते कालकृतौ जगप्रवृत्त्युपसंहारावुपलभ्य कालसद्भावोनुमीयते । तथाहि सत्स्वपि वीजचितिसलिलज्वलनपवनाकाशाख्येषु प्रत्ययेषु न सर्व्वदाङ्कुरादेरुदय उपलभ्यते । अथ कदाचिदेवोपलभ्यते । तदवस्थानविरोधिकालसन्निधाने च निवर्त्तते । तदेवं ॥

यस्मिन् भावे प्रवृत्तिश्च निवृत्तिश्चोपलभ्यते ॥ 204.

स तथानुमित[८]ःकालो नामास्ति, तस्य च सतोपि कारणानुपलम्भान्नित्यत्वमिति । ननु चैवं सति नित्यत्वात् कालस्य तदायत्तोदयानामङ्कुरादीनां सदैवोत्पादः प्राप्नोति । अथ सतोपि न कदाचित् कार्य्यक्रियास्रूपनतव्यापारतास्येति कल्प्येत एवमपि सैवास्यासत्वमापादयिष्यति । अथ सतोपि वीजादिवत् कार्य्यप्रवृत्तियोग्यात्मातिशयासम्मुखीभावान्नास्ति सर्व्वदाका–[३८]

[1]मिव संसारनिवृत्तिर्न स्यात्। विशेषाभ्युपगमेन विकारसद्भावादनित्यः स्यात्। अनित्यस्य च कारणत्वं स्यात्। ततश्च दुःखसन्तानसदृश एव स्यात्। एवं च सति स्वभावत्यागः स्यात्। तस्मात् न युक्तमस्यात्मानमभ्युपेतुं। अभ्युपेत्यापि हि यत् परं प्रति प्रतिपादनासामर्थ्यात् उक्तदोषाच्च परित्याज्यं किन्तेनाभ्युपगतेन प्रयोजनमिति त्यज्यतामात्मवादः। यद्येवं मुक्तावस्थायां मुक्तात्मनोऽप्यसद्भावः। संस्काराणाञ्चापुनरुत्पत्त्या सर्व्वथा परिचयरूपं [२] परमार्थसंज्ञकं निर्व्वाणं वर्ण्यते। तदलमनेनेदृशेन परमार्थेनार्थितेन, इत्यतः आत्मकामस्य ॥

वरं लौकिकमेवेदं परमार्थो न सर्व्वथा।
लौकिके विद्यते किञ्चित् परमार्थे न विद्यते ॥ 222.

नैव हि आत्मकामो लोचनामयसम्पातशङ्कया अक्ष्णोरुत्पाटनमनुतिष्ठति करोति तु आमयोपघातमेव। तथा संसारदुःखोद्विग्नस्य दुःखत्याग एव ज्यायान्। न तु सर्व्वथा सर्व्वाभावः। सर्व्वाभावे हि सति सर्व्वस्य सुखस्याप्युच्छि[३]त्त्या न किञ्चिदनेनात्मन उपकृतं भवति। ततश्च वरं लौकिकमेवेदं। लौकिके हि त्वया किञ्चिदङ्गीक्रियते यत्प्रतीत्यसमुत्पन्नमुपादाय च प्रज्ञप्तं; किञ्चिन्नाङ्गीक्रियते यत् तीर्थिकैरभूतमारोपितं सत्त्वाभाव्यं च भावानां। अथवा यद्दत्तफलमतीतं कर्म्म, तत्फलञ्चानागतम् प्रत्युत्पन्नाश्च संस्कारा इत्येतत् तव लौकिकेनास्ति। तदवशिष्टं नास्तीति वरमेतल्लौकिकं य[४]त्र न सर्व्वाभावः। परमार्थस्तु सर्व्वथा न श्रेयान् सर्व्वथाप्यात्मनोप्यसद्भावादिति।

## बोधिसत्त्वयोगाचारे चतुःशतके नित्यार्थप्रतिषेधोनाम नवमं प्रकरणम्।

अत्राह। यद्यात्मा नाम कश्चित् स्वरूपतः स्यात् तस्य निर्व्वाणे सर्व्वथोच्छेददर्शनात्।

नास्म्यहं न भविष्यामि न मे ऽस्ति न भविष्यतीति।

परिशङ्कितस्य स्यादेवं

वरं लौकिकमे[५]वेदं परमार्थो न सर्व्वथा।
लौकिके विद्यते किञ्चित् परमार्थे न विद्यते ॥

न चात्मा नाम कश्चित् स्वरूपतः सम्भवति। यदि हि स्यात् स नियतं स्त्रीत्वेन वा स्यात् पुरुषत्वेन वा नपुंसकत्वेन वा। ततोन्यस्य कल्पनान्तरस्याभावात्। द्विविधं ह्यात्मानं वर्णयन्ति तीर्थिकाः। यदुतान्तरात्मानं बहिरात्मानञ्च। तत्रान्तरात्मा[६]नाम यः शरीरागारान्तर्व्यवस्थितः शरीरेन्द्रियसंघातस्य तत्र तत्र प्रवर्त्तयितान्तर्व्यापारपुरुषो जगदहङ्कारनिबन्धनः कुशलादिकर्म्मफलोपभोक्ता प्रतितन्त्रमनेकविकल्पभेदभिन्नः। बहिरात्मा तु देहेन्द्रियसंघातरूपोन्तरात्मनो अपकारीव। तत्र यस्तावदयमन्तरात्मा स यदि स्त्रीत्वेन परिकल्प्येत तदा तस्याजहत्स्वरूपत्वात् जन्मान्तरपरिव[७]र्त्तेपि लिङ्गान्तराप्रतिपत्त्या नित्यमेव स्त्रीत्वं स्यात्। न चैतद्दृश्यते, व्यत्ययोपलब्धेः स्त्रीत्वादीनामात्मगुणत्वाभावाच्च। एवं पुंस्त्वे नपुंसकत्वे च वाच्यं। तदेवम्;

[1] [Leaf 37 of the MS.]

अन्तरात्मा यदा न स्त्री न पुमान् न नपुंसकं ।
तदा केवलमज्ञानात् भावस्तेऽहं पुमानिति ॥ 223.

पुमानित्युपलक्षणत्वात् अहं स्त्री नपुंसकमहमिति सर्व्वमेवाज्ञानाद्भवति। विचार्य्यमाणस्य वस्तुसत्त्वस्य तथाऽसिद्धत्वादज्ञानं मुक्ता [८]नान्यत्त(स्त)थापरिकल्पकारणं युक्तम्। रज्जुस्वरूपापरिज्ञाने सर्पाध्यारोपवत् इत्यभिप्रायः। एवं तावदन्तरात्मनो यः स्त्रीत्वादिपरिकल्पो नासौ वस्त्वनुविधायीति स्थितं। अथ मन्यसे वहिरात्मनो लिङ्गान्येतानि स्त्रीपुन्नपुंसकत्वानि, तत् सम्बन्धादन्तरात्मन्यपि परिकल्प्यन्त इति॥ स्यादेतदेवम् यदि वहिरात्मनोप्येतानि युज्यन्ते। कथं कृत्वा। इहाकाशस्य ता[३०क]वन्महाभूतत्वायोगाच्चत्वार्य्येव महाभूतानि। यस्यापि पञ्चमहाभूतानि तस्याप्याकाशस्य शरीरारम्भकत्वायोगाच्चत्वार्य्येव महाभूतानि कारणभावं प्रतिपद्यन्ते॥ तेषु च स्त्रीपुंनपुंसकत्वानि स्वरूपतो न विद्यन्ते। यदि स्युस्तदा तत्स्वभावानुरोधात् सर्व्वदेहानां नियतलिङ्गता स्यात्। कललादपि च लिङ्गोपलब्धिः स्यात् न चैतदस्तीत्यतः।

यदा सर्व्वेषु भूतेषु नास्ति स्त्रीपुन्नपुंसकम्।
तदा किं नाम तान्येव प्राप्य स्त्रीपुन्नपुंसकम् ॥ 224.

किन्नामात्र कारणं यत् स्वरूपतो लिङ्ग[२]रहितानि महाभूतानि प्राप्य स्त्रीपुन्नपुंसकानि देहानां सम्भविष्यन्ति। तदेवं वहिरात्मनोपि स्त्रीपुन्नपुंसकत्वानामयोगात् केवलमज्ञान + + + तवायमभिप्रायः, पुमानहं स्त्री नपुंसकमहमिति। येपि च खट्टाट्टचयो[:]स्तनादिलोमशत्वादेर्निमित्तस्याभावादन्यथा स्त्रीत्वादीनि कल्पयन्ति। तेषामपि कल्पनामात्रं न वार्य्यते। तवाप्ययं समानप्रसङ्ग इति चेन्नैतदेवम्। मम हि निःस्वभावाः पदार्थाः प्रतीत्यसमुत्पन्नत्वात् न च निःस्वभावस्य [३] यथाप्रत्ययमन्यथाभावो न युज्यते चित्रपुरुषमायाङ्गनादिरूपस्येवेत्यदोषः। सस्वभाववादिनस्तु स्वभावस्यान्यथात्वासम्भवात् यथास्वभावं लिङ्गनियमः प्रसज्यते। तदेवं पुमानहमित्येवमादीनां कल्पनानां मोहमात्रसम्भूतत्वादयुक्तम् तल्लिङ्गवत आत्मनः स्वरूपतोऽस्तित्वम्। इतश्चात्मा स्वरूपतो नास्ति। यदि ह्यात्मा स्वरूपतः स्यात् स यथैकस्याहङ्कारस्यालम्बनं तथा [४] सर्व्वेषामप्यहङ्कारस्यालम्बनं। न हि लोके अग्नेरौष्ण्यं स्वभावः कस्यचिदनौष्ण्यं भवति। एवं आत्मा यदि स्वरूपतः स्यात् सर्वेषामात्मेति स्यात् अहङ्कारविषयश्च। न चैतदेवम् तथा हि ॥

यस्तवात्मा ममानात्मा तेनात्मा नियमान्न सः।

यो हि तवात्मा त्वदहङ्कारविषयः आत्मस्नेहविषयश्च स एव ममानात्मा भवति अस्मदहङ्काराविषयत्वादात्मस्नेहाविषयत्वाच्च। यत [५] एतदेवं तेन नियमान्न सः। यश्च नियमादात्मा न भवति स स्वभावतो नास्तीति त्यज्यतां असदर्थे आत्माध्यारोपः। यद्यात्मा नास्ति क तौ इमौ अहङ्कारात्मस्नेहावित्याह।

नन्वनित्येष्वभावेषु कल्पना नाम जायते ॥ 225.

यथोपवर्णितेन न्यायेन स्वरूपसिद्धस्य स्कन्धव्यतिरिक्तस्यात्मनः सर्व्वथाभावात् नन्वनित्येषु रूपवेदनासंज्ञासंस्कारविज्ञानाख्येषु भावेष्वात्मेति कल्पना[६]स्वभूतार्थारोपणं क्रियते आत्मा सत्त्वो जीवो जन्तुरिति। यदाहीन्धनमुपादायाग्निरेवं स्कन्धानुपादाय आत्मा प्रज्ञप्यते, स च स्कन्धेभ्यस्तत्त्वान्यत्वेन पञ्चधा च निरूप्यमाणः स्वभावतो नास्तीत्युपादाय प्रज्ञप्त्या· परिकल्प्यत इत्येवमनित्येषु संसारेष्वात्मपरिकल्पना भवतीति स्थितम्।

अत्राह। अस्त्येवात्मा स्वभावतः प्रवृत्तिनिवृत्तिकारणत्वात्। यदि ह्यात्मा न स्यात् कः शुभमशुभं [७] वा कर्म्म कृत्वा तत्फलं सम्वेदयेत्। स हि शुभमशुभम् वा कर्म्म कृत्वा जातिगतियोन्यादिभेदभिन्ने त्रैधातुके कर्म्मानुरूपं जन्मप्रबन्धमनन्तप्रभेदं सुखदुःखफलोपभोगनिबन्धनमासादयति। स ह्यभिसंस्कर्त्ता च, प्रत्यनुभविता च, स हन्यते चाधर्मेन स्पृश्यते मुच्यते च। तस्मादस्ति स्वरूपत आत्मेति। किं पुनरयमात्मा जन्मान्तरपरिवर्त्तेषु देहभेदविकारमनुरुध्यते, अथ न। यदि तावन्नानुरुध्यते, त[८]दा किमनेना-किंचित्करेणात्मपरिकल्पनेन। अथानुरुध्यते, तदा नियतं तव

देहवद्विकृतिं याति पुमान् जन्मनि जन्मनि।

ततश्च; देहान्तेनान्यता तस्य नित्यता च न युज्यते। 226.

नासौ देहादन्यो देहविकारानुविधायित्वात् देहैकदेशवन्नापि नित्यो देहादनन्यत्वात्। देहस्वात्मवत् इत्ययुक्त आत्माध्यारोपः। स हि प्रतिक्षणविनश्वराणां संस्काराणां अवस्थानाभावात् कर्म्मफलसंवेदनाय नित्यमात्मानं प्रतिपन्नः। [२७]

[1]मस्तस्य निःप्रयोजनमेवेन्धोपार्ज्जनमिति, तद्वदेतत्। ततश्चास्य महदादेर्विकारग्रामस्य विफलैव प्रवृत्तिरिति व्यर्थ एवास्य शास्त्रे प्रक्रियाप्रणयनश्रमो लक्ष्यते। अथ स्याच्चैतन्यशक्तिरूपः पुरुषः तस्य चक्षुरादिकरणव्यापारनिबन्धनबुद्ध्यभिव्यक्तेः चैतन्यवृत्त्यभिव्यक्तेरुपभोक्ता हि पुरुषः स विषयोपभुक्तिक्रियाभिनिर्वृत्त्या विषयं चेतयते। सा ह्यस्य विषयोपभुक्तिश्चैतन्यवृत्त्यात्मिका क्रिया, सा च न विना चक्षुरादिना करण[२]ग्रामेण भवतीति कुतोऽस्य विकारग्रामस्य वृथात्वमिति। उच्यते। यदि चैतन्यवृत्तिस्वरूपं तदास्य क्रियया धर्म्मानतिक्रमेण भवितव्यम्। कश्च क्रियाणां धर्म्मो द्रव्याश्रयत्वं चलत्वं च। तथाहि॥

आविनाशाच्चलं नाम द्रव्यं नास्ति क्रिया यथा॥

द्रव्यव्यापाररूपा हि क्रिया सा चोदयात् प्रभृत्याविनाशाच्चला। तथाहि वृक्षादयः, पवनाभ्युपनिपातमन्तरेण नारब्धक्रियास्तिष्ठन्त्यविचलाः [३] कम्पनक्रिया त्वेषा पवनादिप्रत्ययसम्पातादुपजायमाना आविनाशं चलतां नातिवर्त्तते। यस्मादेतदेवं।

पुरुषोस्ति न चैतन्यमिति तेन न युज्यते। 233.

यथा वृक्षादयः चलनक्रियाप्रारम्भात् प्रागवस्थायां वृक्षाद्यात्मना द्रव्यरूपेणोपलभ्यन्ते, नैवं पुरुषः। स हि चैतन्यरूपमात्रत्वात् न तद्व्यतिरिक्तः। द्रव्यरूपत्वाभावाच्च चैतन्यरहितेनाप्यात्मना[४]स्तीति न शक्यते कल्पयितुम्; ततश्च पुरुषः संविद्यते न चैतन्यमिति न युज्यते। यच्चैतन्यशक्तिसद्भावात् पुरुषस्यास्तित्वं कल्प्येत तदप्ययुक्तं। निराधारायाः शक्तेरसद्भावात्; यथा चैतन्यवृत्तिव्यतिरिक्तः पुमान्न सम्भवति एवं शक्त्यवस्थायामपि चैतन्यशक्तिमात्रव्यतिरिक्तः पुरुषो नास्ति। ततश्च निराश्रया नास्ति शक्तिः शक्त्यभावाच्च शक्ते र्व्यक्तिरूप[५]भावोपयोगित्वेन यच्चक्षुरादीनां सोपयोगित्वं कल्पितं तदयुक्तमेवेत्यविचलमेतत्।

[2]करणं जायते मिथ्या चैतन्यं शाश्वतं यदि। इति।

अपि चायं पुरुषो यदि चैतन्यव्यक्तेः पूर्व्वं चैतन्यशक्तिरूपः स्यात् तदा॥

चेतनाधातुरन्यत्र दृश्यतेऽन्यत्र चेतना॥

चैतन्यस्य द्वैरूप्यकल्पनायां अन्यत्र पृथक्त्वेन चेतनायाः चेतनाधातुश्चेतनाबीजं चेतनाशक्ति[६]र्दृश्यते त्वया। चेतनाशक्तेश्चान्यत्र पृथक् चेतनाधातोश्चेतना प्रवर्त्तमाना चेतनाधातुसमानदेशा प्रवर्त्तते। दृष्टान्तमाह॥ द्रवत्वमिव लोहस्येति॥ यथा लोहं द्रवतामापद्यमानं लोहदेशाभिन्नदेशं भवति तद्वत्। बीजाङ्कुरयो-र्ह्याविर्भावतिरोभावदर्शनान्न समानदेशता। न च पुरुषस्याविर्भावतिरोभावाविति समानदेशमस्ति। अत एवाचार्य्यो लोहस्य द्र[७]वतादृष्टान्तमाह॥ न च चैतन्यशक्तिरूपात् पृथक् पुरुषोस्ति व्यक्तस्ततोऽनन्यत्वात्। तदयं शक्तिरूपापन्नो व्यक्तिरूपतामापद्यमानः।

द्रवत्वमिव लोहस्य विकृतिं यात्यतः पुमान्॥ 234.

विक्रियमाणत्वाच्च लोहवदेव नास्यात्मनो नित्यत्वमिति सिद्धम्। अन्ये पुनराहुः। नैव ह्यस्माकं चैतन्यरूपः पुमान् किं तर्हि॥

---

1 [Leaf 35 of the MS.]

2 This is taken from 232.

चैतन्यञ्च मनोमात्रे महांश्चाकाशवत् पुमान् [८]

आत्मा हि प्रतिशरीरे सर्व्वप्राणभृतामाकाशवत् विभुः, तस्य च मनोमात्रसंयुक्ता चेतना न सर्व्वव्यापिनी। मनश्चात्मनः परमाणुमात्रप्रदेशसंयुक्तं। तेन मनसा संयुज्य पुरुषस्तद्भिन्नदेशं चैतन्यमुत्पादयति। ततश्च यथोक्तदोषानवसरोऽस्मत्पक्षः इति। उच्यते यतएव त्वाकाशवदिति महतः पुरुषस्य मनोमात्रे चैतन्यमभ्युपेयते ननु त्वया ॥

अचैतन्यं ततस्तस्य स्वरूपमिव दृश्यते ॥ [९] 235.

एवं सत्यचेतन एव पुरुषः प्राप्नोति। न हि परमाणुमात्रप्रदेशचेतनासम्बन्धेन सचेतनः पुरुष इति युक्तं वक्तुं। न हि लवण-परमाणुमात्रसम्पर्कात् गङ्गाह्रदजलं सलवणमिति शक्यं सम्भावयितुं, तद्वदेतत् द्रव्यं चात्मा चैतन्यञ्च गुणरूपं तयोः परस्परभेदात् अचेतन-स्वरूप एव पुमान्। न चास्याचेतनस्य घटस्येवात्मत्वं कल्पयितुं न्याय्यमिति न युक्त आत्मा ॥ यदि चायमात्मा प्रति[२५क]सत्त्वं सर्व्वगतः स्यात्तदा ॥

परस्त्वेति किन्नाहमहं सर्व्वगतो यदि ॥

यदि भाविकया कल्पनया अहं सर्व्वगतः सर्व्वव्यापी स्यामाकाशवत् तदा सत्त्वान्तरेष्वयं मदात्मनः सद्भावात् किमिति तस्य तस्मिन् ममेवाहङ्कारो नोत्पद्येत। एवं ह्यस्य सर्व्वगतत्वं युज्यते, यदिह ममेव परस्यापि मदात्मनि स्यादहङ्कारः। न च परात्मनास्य मदात्मनः परशरीरे युक्तमावरणं। न हि परात्मदेशेऽस्मदात्मनोऽसद्भावः सर्व्वात्मना[२]व्यापित्वाभ्युपगमात्। यदा च समानदेशता तदा न तेन तस्यावरणं शक्यं कर्त्तुमिति प्रतिपादयन्नाह ॥

तेनैवावरणं नाम न तस्यैवोपपद्यत इति ॥ 236.

समानदेशत्वात् स्वात्मस्वरूपस्येव स्वात्मना नास्त्यावरणमिति अहङ्कारविषयत्वं परात्मनोपि प्रसज्यते। तेनैवं भवतीति न सर्व्वगत आत्मा। एवं तावदुभयमतेप्यात्मनोस्तित्वं अयुक्तमिति प्रतिपाद्य गुणानामपि सकल[३]जगत्कर्तृत्वासम्भवेनायुक्तरूपतां प्रतिपादयन्नाह ॥

येषां गुणानां कर्त्तृत्वमचैतन्यञ्च सर्व्वशः।

तेषामुन्मत्तकानाञ्च न किञ्चिद्विद्यतेऽन्तरम् ॥ 237.

सत्त्वरजस्तमांसि त्रयो गुणाः तेषां साम्यावस्था प्रधानं प्रसवावस्था प्रकृतिः। सेदानीं त्रिगुणात्मिका प्रकृतिरचेतनापि सती, पुरुषस्य विदितविषयोपभोगौत्सुक्यात् पुरुषेणाभेद्यं प्रतिपद्य सक[४]लं विकारग्रामं प्रसूते। तत्र चायं क्रमो, यदुत, प्रकृते र्महान् महानिति बुद्धेः पर्य्यायः महतोऽहङ्कारः स च त्रिविधः। सात्त्विको राजसस्तामस इति। तत्र सात्त्विकादहङ्कारात् पञ्चबुद्धीन्द्रियाणि श्रोत्रं त्वक् चक्षुः रसनं घ्राणमिति। पञ्चकर्म्मेन्द्रियाणि वाक् पाणि पाद पायूपस्थाख्यानि। उभयात्मकं च मनः इत्येकादश प्रवर्त्तन्ते। राजसादहङ्कारात् [५] पञ्चतन्मात्राणि शब्दस्पर्शरूपरसगन्धाः। तन्मात्रेभ्यो भूतानि आकाश-वायु-तेजो-वायु-जल-पृथिव्याख्यानि। तामसस्त्वहङ्कार उभयोरहङ्कारयोः प्रवर्त्तक इत्येवं प्रकृतिविकाररूपत्वात् सकलस्य विकारग्रामस्य त्रयो गुणाः प्रवर्त्तका इत्येवं येषां वादिनां गुणानां कर्त्तृत्वमचैतन्यञ्च इति अभिप्रायः। वस्तुतत्त्वविचक्षणाः तेषामुन्मत्त[६]कानाञ्च न किञ्चिद्विद्यतेऽन्तरम् इति पश्यन्ति। उन्मत्तको हि नाम

विपर्य्यस्तविज्ञानसन्ततिः। स हि विपर्य्यस्तेन विज्ञानेन, यथार्थं न प्रतिपद्यते, विपरीतञ्चावधारयति असदर्थञ्च प्रलपति, तथा चायमपि सांख्यः। अचेतनानां गुणानां कर्तृत्वं शास्त्रेण प्रतिपादयन् यथार्थो व्यवस्थापितः तथा न प्रतिपद्यते, विपरीतञ्चावधारयति, असदर्थं [७] प्रलपतीति तुल्य एवोन्मत्तकैः स भाव्यते। अपि चास्यायं पुरुषो विकारग्रामस्याकर्त्ता च भोक्ता च। गुणास्तु कर्त्तारो न तु भोक्तारः तदयं कर्त्तृत्वमभोक्तृत्वञ्च निरुपपत्तिकं गुणानामावेदयन् अत्यन्तायुक्ततामेवात्मनः प्रकटयतीति प्रतिपादयन्नाह ॥

कर्त्तुन्नाम विजानन्ति गृहादीन् सर्व्वथा गुणाः।
भोक्तुञ्च न विजानन्ति किमयुक्तमतः परम् ॥ 238.

युक्तिविरुद्धत्वात् लोकासम्मतत्वा[८]च्चास्य मतस्य नातःपरमयुक्ततरमस्तीत्यभिप्रायः। इत्येवं तावद्गुणानां कर्त्तृत्वमयुक्तं।

यस्याप्यात्मैव कर्त्ता धर्म्माधर्म्मयोः फलस्य चोपभोक्तेति मतन्तस्याप्यात्मनो नित्यत्वमयुक्तं ॥ यस्मात् क्रियावांश्चाश्वतो नास्ति ॥ इह करोतीति कर्त्ता तस्य क्रियानिबन्धनं कर्त्तृत्वं। नह्यकिञ्चित् कुर्व्वाणो निर्हेतुकः कश्चित् कर्त्तेति युज्यते। सति च क्रियावत्त्वे; नियतन्तु क्रियाप्रागव [२५]

[1]ति। तथाहि तस्यानागतभावच्युत्या[द्]हेतुप्रत्ययैर्वर्त्तमानता भवति। न चैवमसंस्कृतं स्वरूपात् प्रच्यवत इति नास्यासंस्कृतवन्नित्यत्वमिति। एवमपि कल्प्यमाने।

विनापि जन्मना भङ्गादनित्यो यद्यनागतः। 253.

एवं तर्हि॥

अतीतस्य न भङ्गोऽस्ति स नित्यः किं न कल्प्यते।

यदि स्वरूपप्रच्युतिसद्भावादनागतस्य नित्यत्व + + + + + + तीतस्य तर्हि स्वरूपप्रच्युतिर्नास्तीति स नित्य इति कल्प्यतां।

कस्य वा पदार्थस्य शक्यमनित्यत्वं कल्प[२]यितुं। यदा च न शक्यते तदा सर्व्वपदार्थानामनित्यत्वस्यासम्भवान्नित्यतैव सम्भाव्यते। तच तावत्॥

अनित्यो वर्त्तमानोयमतीतश्च न जायते। 254.

यस्तावदयं वर्त्तमानः पदार्थः तस्य तावदनित्यत्वं नास्ति। स हि वर्त्तमानत्वात् स्वभावादच्युतेर्वर्त्तमान इति व्यपदिश्यते। यस्य चानित्यत्वं स वर्त्तमान एव न भवत्यभावेनाभिसम्बन्धात्। भावाभावयोश्च युगपदसम्भवात्। वर्त्तमानस्यानित्यत्वं न सम्भवति। अतीतस्या[३]प्यनित्यत्वं न सम्भवति। विनष्टो ह्यतीत उच्यते। न च विनष्टस्य पुनरपि विनाशो न्याय्यो निःप्रयोजनत्वात् आश्रयाभावात् अनवस्थाप्रसङ्गाच्च। एवं तावत् अनित्यो वर्त्तमानोयमतीतश्च न जायते। न च वर्त्तमानात्यतीतौ मुक्त्वा तस्यानित्यत्वस्य तृतीयोवकाशो युज्यत इत्याह॥

ताभ्यामन्या तृतीयापि गतिस्तस्य न विद्यते॥ 255.

उत्पन्नस्य यदा नित्यताश्रयस्यानि[४]त्यत्वमसम्भाव्यं तदोत्पत्तिशून्यस्यानागतस्याकाशादेरिव तत्स्यादित्यत्यन्तमसंगतम्। न चानित्यतारहितस्याकाशादेरध्वत्रयकल्पना युक्तिमती तद्वत् सस्वभावभाववादिनो न युक्तं अध्वत्रयम्। अत्राहास्त्येव अनागतो भावस्तस्य सत्सु प्रत्ययेषु जन्मदर्शनात्। नह्यसतः पूर्व्वं, पश्चात् जन्म युज्यते वन्ध्यापुत्रादेरिव। ततश्च जन्मदर्शनात् अस्त्येवानागतो भाव इति। एवमपि कल्प्यमाने। [५]

यः पश्चाज्जायते भावः स पूर्व्वं विद्यते यदि।
न मिथ्या जायते पचस्तेषां नियतिवादिनाम्॥ 256.

य उत्पादात् प्रागवस्थो भावो हेतुप्रत्ययैः पश्चात् जायते स यदि उत्पादात् पूर्व्वं स्वरूपतोऽस्तीति कल्प्यते एवं सति नियतिवादिनां प्रतिनियतस्वभावं निर्हेतुकं पुरुषकारशून्यं उपपत्तिविरुद्धं जगद्वर्णयतां नाभ्युपगमो मिथ्या स्यात्। न च न [६] मिथ्या तेषां वादस्तत्पचस्य दृष्टादृष्टविरोधात् पुरुषकारानपेचत्वात् तेषां जगत्प्रतीत्यसमुत्पादाभावस्तदभावाच्च खरविषाणवत् सर्व्वं जगदग्राह्यं स्यादित्ययुक्तो नियतिवादः। यदि चास्यानागतसद्भाववादिनो न्याय्यः स्यात् तदा नियतिवादिनामपि वादो न्याय्यः स्यादित्ययुक्तो नागतार्थसद्भाववादः। इतश्चायुक्तो यतः॥

संभवः क्रियते यस्य प्राक्सो[७]ऽस्तीति न युज्यते।
सतो यदि भवेज्जन्म जातस्यापि भवेद्भवः॥ 257.

---

[1] [Leaf 23 of the MS.]

यस्यार्थस्य हेतुप्रत्ययैरुत्पादनं सम्भवः क्रियते, स जन्मनः पूर्व्वमप्यस्तीति न युज्यते। यदि हि तस्यास्तित्वं स्यात् तदा सतो विद्यमानस्य पुनरपि जन्म स्यात् न च सतः पुनरपि जन्म न्याय्यं, निःप्रयोजनत्वात् अनिष्टप्रसङ्गात्, आसंसारमेकस्यैवार्थस्य पुनरुत्पादेनापरिसमाप्तोदयस्य सतः तत्पदार्थान्तराप्रवृत्तेर्हेतुफलभावव्याघातः स्यात् [८] अस्ति चेयं हेतुफलभूतानां पदार्थानां सन्तानानुवृत्तिरिति न युक्तो नागतपदार्थसद्भावस्य वादः। अत्राह ॥ यदि अनागतं न स्यात् यदेतदनागतार्थालम्बनम् योगिनां प्रणिधिज्ञानं यथार्थं न स्यात्। अस्ति चैतद्यथार्थं योगिनां ज्ञानं, यथार्थानागतार्थव्याकरणात्, तस्य च तथैव भावात् न ह्यसत्सु बन्ध्यातनयादिष्वेतत्सम्भवति, तस्मादस्त्येवानागत इति। उच्यते। तात्त्विकया कल्पनया [२३क] दृश्यतेऽनागतो भावः। केनाभावो न दृश्यते। उत्पादात् प्रागवस्थायामनागतो भावो नास्ति स्वरूपत इति प्रतिपादितम्। यदि चाविद्यमानः पदार्थो योगिभिर्दृश्येत बन्ध्यापुत्रादयोऽपि दृश्येरन्। द्वयोरपि तुल्यं स्वभावासत्त्वं तत्रैको दृश्यते नेतर इति न युज्यते। किं पुनः योगिनो नागतं नेच्छन्ति। यथा भवान् परिकल्पयति तथा नेच्छन्ति। यथाभूतेनानागतेनार्थेन वर्त्तमानावस्थेन भवितव्यम्। तेषां प्रणिधिबलाच्चित्तसमाधिविशेषा[२]त्तु ज्ञानमुत्पद्यमान-तथा-पदार्थाकारं परिकल्पयदुत्पद्यते। न तु वर्त्तमाननीलालम्बनविज्ञानवत् तु तज्ज्ञानं सन्निहितवस्त्वाकारानुकारि जायते तत्तस्य ज्ञानार्थस्य वर्त्तमानत्वप्रसङ्गात्। वस्तुसत्पदार्थवादिनो हि यावत्तस्य वस्तुनोऽस्तित्वं तावत्तथास्वरूपस्यैव पदार्थस्वरूप[न]धिगमस्तदास्य तदस्तु सर्व्वथाभावात् खरविषाणप्रख्यमिति द्वयवादानतिक्रमात् अस्य सर्व्वमेवाभिसमीहितं दुर्घटं जायते। [३] निःस्वभाववादिनस्तु सर्व्वथा वस्तुस्वरूपस्यासम्भवात् भावकल्पना दूरोत्सारिता। येन ह्युत्पत्तव्यं न तस्य नास्तित्वं, यदि ह्यस्य नास्तित्वं स्यात्तदास्य खरविषाणादिवदुत्पादो न स्यात्। अथास्यास्तित्वं स्यात्तदा वर्त्तमानस्येवोत्पादो न स्यादस्ति चास्योत्पाद इति सिद्धोऽयमद्वयवादः। यत एवास्य नास्तित्वं नास्ति तत एवानागतदर्शनमविरुद्धं यतश्चास्तित्वं नास्ति तत [४] एवानागतव्यपदेशोऽपि सिध्यति। एष च लौकिको व्यवहारो न परमार्थ इति नात्रैकान्तेनोपपत्तिरवतार्य्यते। बुद्धानां भगवतां यदनागते ज्ञानं तत् पूर्व्वप्रणिधानाधिष्ठानाच्चित्तयथार्थप्रतिपादकशब्दश्रुतिबलाधानात् तथाविधधर्म्मश्रवणसम्वर्त्तनीयकर्म्मविशेषप्रभावपरिणतविज्ञानसन्तानाः तथाकारानुविद्धविज्ञानोदयास्तथागताधिष्ठानात् तमर्थं प्रतिपद्य[५]माना यथार्थं प्रतिपद्यन्ते। कालान्तरेण च तमर्थं वर्त्तमानीभूतं तथैवावगच्छन्तीत्येवमनागते बुद्धानां ज्ञानं व्यवस्थाप्यते। न तु पूर्व्वधर्म्मस्वभावव्यवस्थितास्ते किञ्चित् पश्यन्त्युदाहरन्ति चेत्यलं प्रसङ्गेन। एवं तावदनागतपदार्थसद्भाववादिनो नागतदर्शनासम्भवः। अपि च। यस्यानागतोऽर्थः स्वरूपतोऽस्ति, तस्य न तद्दूरे स्यात्, अस्ति चास्य दूरत्वं। दूरं धर्म्माः कतमे अ[६]तीतानागताः। अन्तिकं धर्म्माः कतमे प्रत्युत्पन्नाः इत्यभ्युपगमादनागतमस्य दूरे, तच्चास्य दूरत्वमयुक्तमिति प्रतिपादयन्नाह।

विद्यते नागतं यस्य दूरं तस्य न विद्यते। 258.

वर्त्तमानस्य विद्यमानत्वादित्यभिप्रायः। यस्यानेन कल्याणमित्रसम्पर्कधर्म्मश्रवणेन्द्रियपरिपाकादिकाङ्गाविनः प्रत्ययाद्दानशीलाद्यात्मको धर्म्मः सोऽप्यनागतार्थसद्भाववादित्वाद[७]स्त्येवेति। तदा।

धर्म्मो यद्यकृतोऽप्यस्ति नियमो जायते वृथा।

यदर्थमस्य कायवाङ्मनसां संयमः स धर्म्मोऽस्याकृत एवास्तीति तदुपार्ज्जनाय नियमश्रमोऽस्य वृथा। तेन विनिपातस्यासम्भवात्। अथास्य तेन नियमेन तस्य धर्म्मस्य कश्चिद्विशेषो निष्पाद्यते, स एव विशेषः पूर्व्वमसन्(त्)त् पश्चात् क्रियते इति व्याहन्यतेऽस्य तर्हि सद्भाववादित्वमिति प्रतिपादयन्नाह—

अथ स्वल्पोऽपि कर्त्तव्यः सत्कार्य्यस्य न सम्भवः। 259.

अपि च। यस्यानित्याः संस्कारा इत्यभ्युपगमस्तस्याध्वत्रयेऽप्यव्यभिचारादनित्यताया यदनित्यत्वं तस्य पूर्व्वापरयोर्भागयोर्नियतमसत्त्वेन भवितव्यं; एवं ह्यस्यानित्यत्वं सिध्यति। अथोदयात् पूर्व्वापरयोरप्यवस्थयोरस्यास्तित्वं स्यात्तदास्य+++चापद्यते। अथानेनानित्यत्वमङ्गीक्रियते तदास्य अनित्ये सति सत्कार्य्यं कथं नाम [२३]

[1]वृत्त्या मोक्षावाप्तिरिति निश्चयः। यदा चैवं सर्व्वत्यागेन सर्व्वपाषण्डिनां निर्व्वाणमभिमतं तदा न किञ्चित् मयात्रापूर्व्वमुपचरितम् यद्वैमुख्यकारणं भवेत्। येषामेव हि पदार्थानां निर्व्वाणे पुनरप्रवृत्त्या निवृत्तिरभिसमीहिता तेषामेव मया नैःस्वाभाव्यप्रतिपादनपरेण शास्त्रेणासद्दर्शनकटा + + + + + + + + निर्व्वाणनगरगामिमार्गपरिशोधनमनुष्ठितं, तत्किमिति हृदि भयमसदालिख्य भवान् विभे[२]ति। आधीयतां मनःपरितोषः, क्रियतां आत्ममादरं धर्म्मा, निवेश्यतां चेतसि सांक्लेशिकवस्तुनिवारणकथा। ननु च यदि सर्व्वपाषण्डिनामप्ययमेवाभिप्रायः यदुत सर्व्वत्यागेन निर्व्वाणमिति ; कः पुनर्भवतस्तीर्थिकानाञ्च विशेषः। अयं विशेषो यत्तीर्थिकानां सर्व्वत्यागाभि[प्राय]मात्रं न तु पुनः सर्व्वत्यागोपायाख्यानमनुपदिष्टे च सर्व्वत्यागोपाये

किं करिष्यति स त्यागं त्यागो[३]पायं न वेत्ति यः।

सर्व्वत्यागाशयेऽपि स्थिततीर्थिकमतावलम्बी त्यागोपायानभिज्ञः किं त्यागं करिष्यति। यन्न जानाति सर्व्वधर्म्मस्वभावशून्यतालक्षणं सर्व्वत्यागोपायं परमार्थसत्यम्। अतएव।

शिवमन्यत्र नास्तीति नूनं तेनोक्तवान् मुनिः। 265.

इहैकः प्रथमश्रवण इह द्वितीयो यावच्चतुर्थः। शून्याः परप्रवादाः श्रवणैरित्यमुनैवाभिसन्धिना मुनिनैवमु[४]क्तमिति निश्चीयते अस्मादेव च सर्व्वत्यागोपायसमाख्यानात् सर्व्वत्रैव भगवतो बुद्धस्य ज्ञानप्रवृत्त्यव्याघातेन यथार्थशास्तृत्वं प्रतीयते। तीर्थिकानां च सर्व्वत्यागोपायसमाख्यानसामर्थ्यवैकल्येनेतरत्रापि पदार्थजाते विपर्य्यस्तविज्ञानता सिद्धत्वान्न साध्या (marginal note अनिष्ट सिद्धेः)। ननु च तवापि अपर्य्यन्तत्वात् ज्ञेयस्यातीन्द्रियेष्वर्थेषूपदिष्टेषु असमक्षत्वात् ते[५]षां संशय एव जायते किमसावर्थो यथोपदिष्टस्तथैवाहोस्वित् अन्यथेति। न हि तद्विषयं निश्चयकारणमस्तीति। तत्राप्युच्यते॥

बुद्धोक्तेषु परोक्षेषु जायते यस्य संशयः।

इहैव प्रत्ययस्तेन कर्त्तव्यः शून्यतां प्रति॥ 266.

न हि सर्व्वे भावाः प्रत्यक्षज्ञानगम्या अनुमानगम्या अपि विद्यन्ते। शक्यं चात्रानुमानं कर्त्तुं दृष्टान्तसद्भावात्। इह त्या[६]गोपायः सर्व्वधर्म्मस्वभावशून्यता। सा चाशक्या केनचिदन्यथात्वमासादयितुं; सूक्ष्मश्चायमर्थो नित्यसन्निहितोऽपि सर्व्वजनासमक्षत्वात् तस्य चोपपत्त्या सर्व्वधर्म्मस्वभावग्राहविनिवारणमुखेनोपपादिता यथावत्ता। अत्रैव तावदास्थीयतां निश्चयः। किमेवमेवैतत् उताहोऽन्यथेति अथात्रास्ति किञ्चिदनिश्चयकारणं तदुपदिश्यतां यदि तच्च निराकृतं [७] उक्तवक्ष्यमाणप्रकरणप्रतिपादितनिश्चयेन। न च शक्यमनेन स्वल्पमप्यनिश्चयकारणं किंचिदभिधातुमिति सिद्ध एवायं दृष्टान्तः ततश्चान्यदप्यसमक्षार्थप्रतिपादकवचनं भगवतो यथार्थमिति प्रतीयताम् स्वनयेनैव तथागतोपदिष्टत्वात् स्वभावशून्यतार्थाभिधायकवचनवदिति कुतो बुद्धोक्तेषु परोक्षेषु संशयावकाशः। न च तथागतवत्तीर्थिकानामपि शक्यम[८]विपरीतार्थाभिधायित्वमवसातुं तेषां दृष्ट एव विपर्य्यस्तत्वात्। तथाह्यस्य लोकस्य तैर्न्नित्यकारणपूर्व्विका प्रवृत्तिरुपदिश्यते। सा चाशक्यप्रतिपाद्या दृष्टविरुद्धा चोपपत्तिविरुद्धा चेत्येवम्।

[1] [Leaf 24 of the MS.]

लोकोयं येन दुर्दृष्टो मूढ एव परत्र सः ।

न हि सम्पूर्णं चन्द्रमपि व्याहतदर्शनसामर्थ्यो भवमरुन्धतीं वापश्यतीति सम्भाव्यं । तद्वदयं तीर्थिको लोकस्य सत्त्वभाजनाख्यस्य हे[ २४ क ]तुफलव्यामूढत्वात् स्थूलमेवार्थं तावद्यदा न सम्यगीचते, तदा कथमयमतिसूक्ष्मं विदूरदेशकालव्यवहितं सप्रभेदमर्थं ज्ञास्यतीति स[म्भा]वयितुं शक्यम् । तदिमं तीर्थिकं स्वयमत्यन्तविपर्यासितदर्शनं मृगतृष्णाजलवदनुपासनीयम् तत्त्वदर्शनामलजलपिपासवः संसाराध्वपरिश्रम-क्लमापनोदाय ।

वञ्चितास्ते भविष्यन्ति सुचिरं येऽनुयान्ति तम् । 267.

अपर्य्यवसानापरकोटिके संसारे ते वत वञ्चिता भविष्यन्ति ये यथार्थशास्तारं [ २ ] बुद्धं भगवन्त-मवधूय दृष्टादृष्टपदार्थस्वभावव्यामूढं मोचकामतया तीर्थिकमनुयास्यन्ति । कस्मात् पुनरेते मोचकामा[स्त]-मेवं विपर्य्यस्तदर्शनं तीर्थिकमनुगच्छन्ति । स्वभावशून्यताधर्म्मोपदेशश्रवणभयात्तद्वयं[1] नास्त्यहं न भविष्यामि न मेऽस्ति न भविष्यति इत्यालम्ब्योत्त्रासात् । तत्रायं सुचिरमहंकारममकाराभ्यासादत एव कल्याणमित्रपरि-ग्रहात् सुचिराभ्यस्तमपि भावस्वभावाभिनिवे[३]शं मलवत् त्यक्ता ।

स्वयं ये यान्ति निर्व्वाणं ते कुर्व्वन्ति सुदुष्करम् ।

बुद्धो भगवान् स्वयं भूत्वा स्वयमेव निर्व्वाणपुरमुपयाति तस्येत्थं दुष्करकारिणः ।

गन्तुं नोत्सहते नेतुः पृष्ठतोऽप्यसतो मनः ॥ 268.

न केवलमसतां अहङ्कारममकारव्यवस्थितानां स्वयमेव निर्व्वाणं गन्तुं मनो नोत्सहते ; अपि खलु यथोपवर्णितस्य नेतुः पृष्ठतोऽप्यस्यासतो निर्व्वा[४]णं गन्तुं मनो नोत्साहं प्रवेदयते । कस्मात् पुनरन्यस्य नेतुः पृष्ठतोप्यसतः पुद्गलस्य निर्व्वाणं गन्तुं मनो नोत्सहते शून्यतायां त्रासात् । कस्य पुनरस्यां त्रासो भवतीति यस्य भवति तं प्रति प्रतिपादयन्नाह ।

त्रासो नारभ्यतेऽदृष्टे दृष्टेऽपैति स सर्व्वशः ॥

नियमेनैव किञ्चित्ज्ञे तेन त्रासो विधीयते ॥ 269.

अव्युत्पन्नशास्त्रसंकेता हि गोपालादयः शतशोऽप्युपदिश्यमानायां शू[५]न्यतायां सर्व्वथा तदनुप्रवेशा-भावे सत्यदृष्टत्वात् शून्यतार्थस्य तेषां त्रासो नोत्पद्यते । तस्मिन् क्षणभङ्ग इव तद्व्यामूढस्य नारकाशाविव मिथ्यादर्शनोपस्तब्धसन्तानस्य दृष्टेऽपैति सर्व्वशः । दृष्टे हि शून्यताख्ये धर्म्मे स सन्त्रासस्तत्पण्डितानां सर्व्वथापैति भयनिमित्तात्मात्मीयाभिनिवेशविगमात् । रज्ज्वामुपयातसर्पविपर्य्यासस्य रज्जुदर्शने सति सर्पभयापगमवत् । य[६]स्तु किञ्चिज्जानाति तस्य नियमेनावश्यंभावितया त्रासो विधीयते । न हि सुशिक्षितो मत्तगजावाहको हस्तिन्युत्क्षाप्यमानस्ततो बिभेति नापि तत्रावहनोत्सुकोऽत्यन्तमूर्खो ग्रामीणः । स हि तत्पातादिदोषा-दर्शनाद्वाहनमेव बहु मन्यमानो न ततो बिभेति । किञ्चिज्ज्ञस्त्वितिरां बिभेति, आत्मनस्तदासनापरिजयं

[1] A later hand cuts out ङ्क and writes on the top रा. retaining the "ya" inserted between ङ्क and य by the original writer of the MS., making the whole o. भयात्तुराग्रत्नाद्वयं which gives no meaning.

मन्यमानः। अपि खलु सर्व्वकार्य्येष्वेवं प्रवृ[७]त्तौ किञ्चिज्ज्ञस्य नियतं त्रासो भवति। न विदिततत्त्वस्य वैशारद्यात्, नाप्यत्यन्तानभिज्ञस्य मोहसन्धारितत्वात्, किञ्चिदिज्ञस्तु चस्यति, किमेतच्छक्यं न शक्यमिति विमर्शोत्पादात्। किमर्थं पुनरमी किञ्चिज्ज्ञा उत्तरं पदं न पर्य्येषन्ते, यावतैषां ज्ञातव्यपरिसमाप्ति र्भवतीति। उच्यते, त्रासात्। किं पुनस्त्रासस्य कारणम्। आद्यानभ्यासस्तस्य पुनः किं कारणम् विपरीताभ्यासस्तदेव प्रतिपाद[८]यन्नाह

एकान्तेनैव बालानां धर्म्मोऽभ्यासः प्रवर्त्तके।
धर्म्मान्निवर्त्तकात्तेषामनभ्यासतया भयम् ॥ 270.

संसारप्रवृत्त्यनुकूलो हि धर्म्मः प्रवर्त्तकः पृथग्जनपर्य्यापन्नायाञ्च भूमौ स्थितानां पृथग्जनानां प्रवर्त्तक एव धर्म्मोऽभ्यासः। स्वभावशून्यता हि निवर्त्तकोधर्म्मः संसारनिवृत्त्यनुकूलत्वात् + + + + स्य परिपन्थी आत्मस्नेहस्तदनुगतचित्तसन्तानत्वात् पृथग्जनास्तत्व्यावर्त्तकाद्धर्म्मात् सुत[२४][1]रां विभ्यति। स्वभावशून्यतां प्रपातमिव मन्यमाना न तां यथावत् प्रतिपत्तुमुत्सहन्ते। तदेवमविद्यासान्द्रान्धकारप्रच्छादितपदार्थतत्वेऽनुपलभ्यमानापरकोटिके संसारमहाटवीकान्तारे प्रनष्टसन्मार्गस्य कस्यचिन्नाम पुद्गलस्य भवति स्वभावशून्यताकथायां चेद्भक्तिः स तदनुकूलप्रत्ययोप + + + + + + + चीयमानप्रसादः शून्यतायां भवति, तथा कार्य्यं करुणावता कृतज्ञेन च भ[ग]वति तथागते। सद्ध[१]र्म्मान्तरायनिमित्तं च कर्म्मात्मनो महाप्रपातहेतुं परिजिहीर्ष[ञ्जुः] संकटमप्यवगाह्य दुर्द्दैयमपि दत्त्वा संग्रहवस्तुचतुष्टयेण संगृह्य सद्धर्म्मोऽयं सद्धर्म्मभाजनेभ्य उपदेष्टव्यः। यस्तु न केवलं यथोपदिष्टं न बहु मन्यते। अपि तु

विघ्नन्तत्वस्य यः कुर्य्यात् वृतो मोहेन केनचित्।
कल्याणाधिगतिस्तस्य नास्ति मोक्षे तु का कथा ॥

मोहेन केनचिदिति ईर्ष्या-मात्सर्य्य-कौसीद्य-भय-श्रोतृविद्वेषादिना तत्त्वोपदे[२]शभाजने जने यस्तत्त्वदेशनश्रवणादिविघातकं करोति। तस्य सुगतेरपि तावदेव मनुष्यात्मिकाया नास्ति सम्भवो नियतमपागमनात् किमुतास्य मोक्षकथावकाशः स्यात्। किं ह्यनेन स्वपरसन्तानयोर्नापकृतम्। तेन हि निःशेषाशामुखव्यापिनः स्फुटतरालोकस्याऽव्ययाप्रतिहतप्रभावृत्तेः प्रतिदिनमविद्यान्धकारोपघातायोपचीयमानालोकनिचय[४]स्याशेषजगदाशयावभासनसमर्थस्य प्रज्ञाप्रदीपस्य सन्तानेन समुपजायमानस्य विघातोऽनुष्ठितः। एवमेव परात्मनोरत्यन्तापकारितां संपश्यता भगवता तथागतेनोक्तम्।

"शीलादपि वरं स्रंसो नतु दृष्टेः कथञ्चन।" इति ॥

सूत्रे उक्तम्, वरं शीलविपन्नो नतु दृष्टिविपन्न इति। तदस्य तथागतस्य वचसः सोपपत्तिकतामुद्भावयन्नाचार्य्य आह।

"शीलेन गम्यते स्व[५]र्गो दृष्ट्या याति परं पदम्" इति।

शीलविपत्ति र्हि सूपचीयमानमृदुमध्याधिमात्रक्रमाणां प्रेततिर्य्यङ्नरकोपपत्तिफला विपाकेयत्ता-

[1] [Leaf 25 of the MS.]

परिच्छेदेन प्रवर्त्तते यद्याक्रान्तसम्यग्दर्शनेष्वार्य्येषु न व्यापद्यते। शीलविशुद्धिस्तुनाक्रान्तसम्यग्दर्शनानां पृथग्जनानां प्र..र्षेण स्वर्गफला। दर्शनविपत्तिस्तु मृदुतरा चेत् स प्यसङ्ख्येयशतसहस्रैरपि शीलविपत्तीनां अशक्या[६]विपाकमहत्तया समीकर्त्तुमपि प्रागेव जेतुम्। अथ चेदस्य पुद्गलस्य कथमपि प्रत्यथा.. सम्यग्दर्शनसम्पत्तिराजायेतार्य्यमार्गोत्पादात्। तदायमवश्यमवधूयानादिसंसारप्रवृत्तमविद्यान्धकारमशेषसत्त्वधातुपुरस्कृतो निर्व्वाणमुपयायादित्येवमतिमहार्घतामस्य तत्त्वदर्शनस्यावेत्य तद्विघाताय विदुषा यतितव्यम्। न चानेन तद्विघातभयद[७]र्शिना मता सर्व्वत्रैव अनवधार्य्य पात्रविशेषं एतन्नैरात्म्यदर्शनं उपदेष्टव्यमपात्रेषु। अपात्रे हि तदुपदेशोऽनर्थायैव स्यात्। अतएव च।

अहङ्कारो [ऽ]सतः श्रेयान्न तु नैरात्म्यदर्शनम्।

नैरात्म्यधर्म्माधिमुक्तिविरहितो ह्यात्मग्राहाभिनिविष्टोऽसद्धर्म्मसमाश्रयाद्दृष्टिगहनानुचारी असन्नित्युच्यते। तस्यासतो वरमात्मदेशना दुश्चरितनिवृत्त्यनुकूलत्वात् तस्याः। तथाह्यसावात्मस्नेहानुगमाद्धि [८] तमात्मनाभिवाञ्छन् दुश्चरितनिवृत्तिं बहु मन्यते। निवृत्तपापस्य चास्य सुगतिगमनं भवति सुलभम्। नैरात्म्योपदेशस्तस्य प्रतिक्षेपविपर्य्यासबोधाभ्यां कायचित्तसन्तानं नियतमुपहन्ति। तदेवं

अपायमेव यात्येकः शिवमेव तु नेतरः।

नैरात्म्यदर्शनविप्रतिपन्नो ह्यविद्वान् अपायमेव याति न शिवं। यस्तु नेतरः स शिवमेव याति नापायम्। इतरशब्दोऽयमनुत्कृष्टवाची। कश्चा[२५क]नुत्कृष्टो विपरीतं शून्यतार्थमधिगच्छति प्रतिक्षिपति वा तत्प्रतिषेधेन नेतरः। नेतर इत्युत्कृष्ट इत्यर्थः। यतएव शून्यतोपदेशादितरोऽपायनिविष्टस्ततएव शून्यतोपदेशान्नेतरो निर्व्वाणनिष्ठो जायते। शून्यतादर्शनप्रत्ययः (यं) सर्व्वत्र सङ्गपरित्यागान्निहतक्लेशव र्गणो नियतं निर्वृत्तिमुपयाति। किं पुनरिदं नैरात्म्यन्नाम यदसत्सु नोपदेष्टव्यं सत्सु चोपदेष्टव्यमिति तत्प्रतिपादयन्नाह॥

अद्वितीयं शिवद्वारं कुदृष्टीनां भ[१]यङ्करम्।
विषयः सर्व्वबुद्धानामिति नैरात्म्यमुच्यते॥

यत् अद्वितीयं शिवद्वारं तन्नैरात्म्यं यत् कुदृष्टीनां भयङ्करं तत् नैरात्म्यम्। योऽ[विष]यः सर्व्वबुद्धानां तन्नैरात्म्यमुच्यते। तत्रात्मा नाम भावानां यदपरायत्तस्वरूपस्वभावः। तच्च धर्म्मपुद्गलभेदात् द्वैतं प्रतिपद्यते। धर्म्मनैरात्म्यं पुद्गलनैरात्म्यञ्चेति। तत्र पुद्गलो नाम यः स्कन्धपञ्चकस्योपादानाख्यस्योपादाता स्कन्धानुपादाय प्रज्ञप्यते। स च स्कन्धेषु पञ्चधा [२] मृग्यमाणो न सम्भवति। धर्म्मास्तु स्कन्धा घनधातुसंशब्दिताः पदार्थास्तदेषां धर्म्माणां पुद्गलस्य च यथास्वं हेतुप्रत्ययाधीनजन्मत्वात् उपादाय प्रज्ञप्यमानत्वाच्च स्वायत्तमपरायत्तं निजमकृतकरूपं नास्तीति पुद्गलस्य धर्म्माणाञ्च नैःस्वाभाव्यं व्य..स्थाप्यते। यस्य चार्थस्य स्वरूपसिद्धिर्नास्ति तस्य केनान्येनात्मनास्तु सिद्धिरिति। सर्व्वथा असिद्ध..लक्षणा ए[४]व पदार्थाः मूर्खजनस्य विसम्वादकेनात्मना प्रतीत्य चोपादाय वा वर्त्तमाना मूढधियां सङ्गास्पदं सम्भवन्ति ; यथास्वभावन्तु सम्यग्दर्शनैः प्रति भाव्यमाना धर्म्मपुद्गलयोः सङ्गपरिक्षयस्य निर्व्वाणावाप्तिकारणं। नैरात्म्यमद्वितीयं शिवद्वारं भवति। निर्व्वाणपुरप्रवेशाय एकमेवासहायमेतत् द्वारं। यद्यपि शून्यतानिमित्ताप्रणिहिताख्यानि त्रीणि विमोक्षमुखानि।

तथापि [५] नैरात्म्यदर्शनमेव प्रधानम्। विदितनैरात्म्यस्य हि भावेषु परिक्षीणसङ्गस्य न क्वचित् काचित् प्रार्थना कुतो वा निमित्तोपलम्भ इत्यद्वितीयमेव शिवद्वारमेतत् नैरात्म्यम्। तच्चैतत् कुदृष्टीनां भयङ्करं कथिता दृष्टयः। नैरात्म्ये हि वस्तुनः सर्व्वथानुपलम्भात् कुदृष्टीनां वस्तुस्वरूपपरिकल्पसमाश्रयनात् अत्यन्तविनाशदर्शनात् भयङ्करमेतन्नैरात्म्यम्। विषयः सर्व्वबुद्धा[६]नां नैरात्म्यं। सर्व्वबुद्धानामिति श्रावकप्रत्येकबुद्धानुत्तरसम्यक्सम्बुद्धानां ज्ञानविशेषविषयत्वेनावस्थानात् विषयः सर्व्वबुद्धानामित्युच्यते धर्म्मशरीराव्यतिरेकवर्त्तितां वा सर्व्वेषां सम्यक् सम्बुद्धानामावेदयन्नाह विषयः सर्व्वबुद्धानामिति। विशेषणमात्मयनैरात्म्यमुक्तमाचार्य्येण एतच्च नैरात्म्यं सता मन्दधियो नोपदेष्टव्यम् यस्मात्॥

अस्य धर्म्मस्य ना[७]म्नोऽपि भयमुत्पद्यतेऽसतः॥ 271.

असतो ह्यस्य धर्म्मस्यातिदुर्गाधगम्भीरत्वात् नैरात्म्यशब्दश्रवणादपि भयमुत्पद्यते। तथा हि॥

वलवान् नाम को दृष्टः परस्य न भयङ्करः॥

बलवन्नैरात्म्यदर्शनं सर्व्वासद्दर्शनोन्मूलनसमर्थत्वात्॥ दुर्व्वलमसद्दर्शनमुन्मूलनीयत्वात्। नियतञ्चैतत् यद्[ब]लवान् सबलादि[भे]तीति। तस्मान्न दुर्व्वलस्य कुदर्शनेनात्मीकृतचित्तसन्तानस्यायं धर्म्मः उपदेष्टव्यो भयहेतुरिति कृत्वा। ननु [८] च उपदेष्टव्य एवायं धर्म्मः सकलकुदर्शनप्रमाथित्वात्। तथाह्य[व]श्यं परप्रवादिनः सह धर्म्मेण निग्रहीतव्याः। ततश्च वादार्थिना सता परमतविजिगीषुणायं धर्म्मोऽपात्रेष्वप्युपदेष्टव्य इति। उच्यते नैतदेवं यस्मात्

वादस्य कृतशो धर्म्मः नायमुक्तस्तथागतैः। 272.

यदि चायं धर्म्मः वादस्य कृते++++स्यात् स्यादेतदेवं न त्वयं वादार्थ उपदिष्टो विमोक्षमुखेनोपदेशात्॥ यद्यप्येवं [२५]

[1]स्थः पश्येत्तद्रूपं पश्येद्विषयदेशं वा गत्वा पश्येदगत्वा वा उभयथा [च] दोष इति प्रतिपादयन्नाह ।

पश्येच्चक्षुश्चिराद्दूरे गतिमद्यदि तद्भवेत् ।

अत्यभ्यासे च दूरे च रूपं व्यक्तं न तच्च किम् ॥ 288.

यदि चक्षुषः प्राप्तकारित्वात् विषयदेशं गच्छेत् । तदोन्मिषितमात्रेण न चन्द्रतारकादीनर्थान् गृह्णीयात् । + + + + + + + + +

तुल्यकालं विप्रकृष्टविषयग्रहणयुक्तं गतिकालस्य भिन्नत्वात् । पश्यति च चक्षुरुन्मि[२]षितमात्रेण समीपस्थवत् विदूरदेशस्थमपि इत्ययुक्तमे[त]त् । यदि [च] प्राप्तकारि चक्षुः स्यात् तदात्यभ्यासेऽपि पश्येत् अचिस्थ[ा]मञ्जनशलाकां वा दूरे च व्यक्तदर्शनं स्यात् न चैतत् सम्भवतीति अयुक्तमेतत् । अपि च यदि चक्षुर्गत्वा विषयं पश्यति तत् किं विषयं दृष्ट्वा विषयदेशं गच्छति उत अदृष्ट्वा । उ[भ]यथापि दोष इ[ति] प्रतिपादयन्नाह ।

गतेन न गुणः कश्चित् रूपं दृष्ट्वाचि याति चेत् ।

द्रष्टव्यं नियमेनेष्टमिति वा जायते दृ[३]था ॥ 289.

यदि रूपं दृष्ट्वा रूपदेशं चक्षुर्यातीति कल्प्यते । गतेन तेन गमनेन चक्षुषो न किञ्चित् प्रयोजनं । विषयदर्शनार्थं हि चक्षुषो गमनं स च विषयः पूर्व्वमेवेहस्थेन दृष्ट इति [न] किञ्चिद्गमनस्य प्रयोजनम् । अथादृष्ट्वा गच्छति तदा दिदृक्षितविषयदर्शनं नियमेन न प्राप्नोति । अदृष्ट्वा ह्यन्यस्येवानभिलक्षितदेशगमना-द्दृष्टव्यस्य नियमेन दर्शनं न प्राप्नोति । अ[४]थैतद्दोषपरिजिहीर्षया यदि,

गृह्णीयादगतश्चक्षुः पश्येत् सर्व्वमिदं जगत् ।

यस्य नास्ति गतिस्तस्य नास्ति दूरं न चावृतम् ॥ 290.

यो हि मन्यते चक्षुः श्रोत्रमनोऽप्राप्तविषयमित्यागमादप्राप्तवि[ष]यमेव चक्षुरिति तं प्रति उच्यते । प्राप्तकारितामात्रप्रतिषेधपरत्वात् आगमस्य तावदविरोधः । क्वचित् विधेः प्राधान्यं, यत्र तस्याविरोधः । क्वचित् प्रतिषेधस्य प्रा[५]धान्यं यत्र तद्विरोधः । तदत्र विधेरसम्भवात् प्राप्तकारिताप्रतिषेधमात्रेणाप्राप्त-विषयत्वं व्यवस्थाप्यते । विधिमुखेन त्वप्राप्तविषयत्वे कल्प्यमाने इहस्थमेव चक्षुः सर्व्वं जगत् पश्येत् । यस्य हि गतिर्नास्ति तस्य कुतो दूरं । समीपस्थोपि हि अनेनार्थोऽगत्वा द्रष्टव्यो विदूरस्थोऽपीति दूरत्वतोपि विशेषो न स्यात् । यदा चागत्वा पश्यति तदिहस्थमिव [६] विदूरमपि पश्येत् । गतौ हि सत्यां आवृते गतिविघा-तादावृतं नेचत इति युक्तम् । यदा त्वगत्वा द्रष्टव्यं तदावृते गतिप्रतिबन्धाभावादनावृत इव दर्शनं स्यात् । यदि च दर्शनस्वभावं चक्षुः स्यात् तदा स्वभावस्य सर्व्वत्रैवाव्याघातात् स्वरूपमपि पश्येत् । तथा हि लोके,

स्वभावः सर्व्वभावानां पूर्व्वमात्मनि दृश्यते ।

ग्रहणं चक्षुषः केन चक्षुषैव न जायते ॥ 291.

यथा [७] चम्पकमल्लिकादिषु सौगन्ध्यं पूर्व्वं स्वाश्रय एवोपलभ्यते, पश्चात् तत्सम्पर्कात्तैलादिष्वपि । यथा चाग्नेरौष्ण्यं, स्वतोव्यवस्थितं तद्योगात् परतोप्युपलभ्यते । एवं यदि चक्षुषोर्दर्शनस्वाभाव्यं स्यात् तदा

[1] [Leaf 26 of the MS.]

स्वात्मन्येव तान्दर्शनं स्यात्। कस्मात् पुनश्चक्षुषो ग्रहणं चक्षुषैव न भवति। भावानां स्वभावस्य च स्वात्मन्येव प्रथमतरं विद्यमानत्वाच्चक्षुषैव चक्षुषो ग्रहणं न्याय्यं। न चक्षुः स्वात्मानं पश्यतीति [८] स्रोत्रादिवत् परदर्श[न]मप्यस्य न सम्भाव्यते। यस्तु मन्यते न केवलस्य चक्षुषो रूपदर्शनसामर्थ्यमस्ति अपि तु त्रयाणां चक्षूरूपचक्षुर्विज्ञानानां सामग्र्यां सत्यां रूपदर्शनं भवतीति तदप्यसारं यस्मात्,

चक्षुषोस्ति न विज्ञानं विज्ञानस्य न दर्शनं।
उभयं नास्ति रूपस्य ते रूपं दृश्यते कथम् ॥ 292.

चक्षुषस्तावत् विज्ञानं नास्ति न हि चक्षुर्विषयं विजानाति अविज्ञानस्वरूपत्वात्। भौतिकं हि चक्षुस्तस्य ज[१६क]ड़त्वात् विषयबोधो न सम्भाव्यत इति एवं चक्षुषोऽस्ति न विज्ञानम्। नापि विज्ञानस्य दर्शनमस्ति। विज्ञानं हि विजानाति न तु पश्यति। यदि तु विज्ञानं पश्येत् तदा तस्यापि रूपदर्शनं स्यात्, विज्ञानसद्भावात्। रूपस्य तूभयमपि नास्ति; न विज्ञानमवबोधस्वरूपत्वात्, नापि दर्शनं रूपालोचना-भावात्। यदा चैवमन्योन्याथ.वकस्थानी.न्द्रियविषयविज्ञानानि तदा तत्सामग्र्यामपि सत्यां नैव ते रूपं दृश्यते इति सम्भावयितुं शक्यम्। रूप[२]दर्शनाङ्गविकलत्वात् अन्धसमुदायवदित्यभिप्रायः। यदा चैवं रूपस्या(?)-दर्शनासम्भवः; तदा को नामार्हति तत्त्वविद् रूपं दृश्यते इति वक्तुं द्रष्टुं वा। यथा च तत्त्वविन्नार्हति रूपं द्रष्टुं एवं शब्दमपि श्रोतुं नार्हति रूपदर्शनवत् शब्दश्रवणस्यासम्भवात्। इह यदि शब्दः श्रूयते। स श्रवणदेशं संप्राप्तो वा श्रूयेतासंप्राप्तो वा? यदि तावत् संप्राप्तः श्रूयते, स श्रवणदेशं व्रजन् शब्दं वा कुर्व्वाणो व्रजन् निःशब्दो वा? त[३]च यदि पूर्व्वः कल्पस्तदा,

न वक्ता जायते केन शब्दो याति ब्रुवन् यदि।
अथ यात्यब्रुवंस्तस्मिन् प्रत्ययः केन जायते ॥ 293.

ततश्च वक्तृत्वात् देवदत्तवत् शब्दोऽसौ न भवति। अथाब्रुवन् याति तदा तस्मिन् शब्दे निःशब्दे व्रजति शब्दोऽयमिति कस्यावसायो भवेत्। न चागृहीतस्यास्यास्तित्वमिति न युक्तमेतत्। किञ्चान्यत्।

प्राप्तश्चेत् गृह्यते शब्दः तस्यादिः केन गृह्यते।
न चैति केव[४]लः शब्दो गृह्यते केवलः कथम् ॥ 294.

यदि श्रोत्रेन्द्रियस्थानं प्राप्तः शब्दो गृह्यते प्राप्तग्राहित्वाच्छ्रोत्रस्य, शब्दस्यादेर्ग्रहणन्नास्ति न चान्यदिन्द्रियं तस्य ग्राहकं सम्भवतीति। नैव केनचिदस्यादि गृह्यते. ततश्चागृह्यमाणत्वाच्छब्द एवासौ न भवतीत्यभिप्रायः। नवद्रव्यकत्वाच्च शब्दपरमाणोः। न च एति केवलः शब्दः। भवता च शब्दमात्रमेव श्रोत्रेण गृह्यते न गन्धादय इति न [५] युज्यते। यदा शब्दस्याग्रहणमस्तु यदा गन्धादयोपि गृह्यन्ताम् न चेतदेवमिति न प्राप्तविषयत्वं शब्दस्य। अथ यदेतदुक्तं

प्राप्तश्चेत् गृह्यते शब्दस्तस्यादिः केन गृह्यते। इति

यदि तस्यादिर्न गृहीतस्तदा को दोष इति; अयं दोषो यदस्य शब्दत्वमेव विशीर्य्यते तथा हि।

यावन्न श्रूयते शब्दस्तावच्छब्दो न जायते।
अशब्दस्यापि शब्दत्वमन्ते तच्च न युज्यते ॥ 2)5.

यो न श्रूयते [६] सोऽश्रूयमाणत्वात् गन्धादिवत् शब्द एव न भवति। अथ मन्यसे यदा श्रूयते तदा शब्दो भविष्यतीति। एतदप्यसम्भाव्यम्। न हि गन्धादेः पश्चात् शब्दत्वं दृष्टं तद्वदेवास्यापि शब्दस्य पश्चात् शब्दत्वमयुक्तमिति। एवं तावदिन्द्रियाणां विषयग्रहणसामर्थ्यमुद्भाव्य मनसोऽपि विषयग्रहण-सामर्थ्यमुद्भावयन्नाह।

वियुक्तमिन्द्रियैश्चित्तं किं गत्वापि करिष्यति।

यदि चित्तं विषयदेशं [७] गत्वा विषयं परिच्छिनत्तीति कल्प्यते तदयुक्तम्। इहेदं चित्तं इन्द्रिय-सहितं वा विषयदेशं गच्छेत् केवलं वा न तावदिन्द्रियसहितं याति इन्द्रियाणां देह एव सदा सन्निधानात्। गमने च सति देहस्य निरिन्द्रियत्वप्रसङ्गात्। अथ केवलं गच्छति, तदापि

वियुक्तमिन्द्रियैश्चित्तं किं गत्वापि करिष्यति।

न हि चक्षुरादीन्द्रियद्वारतिरस्कृतस्यास्य रूपादिदर्शनसामर्थ्यमस्ति अन्धादीनामपि दर्शनादि-सद्भावप्रसङ्गात्। अ[८]थापि कथञ्चित् विषयदेशगमनेनार्थोपलब्धिरस्य परिकल्प्यते तदाप्यपर्य्यवसानत्वात् अर्थबोधस्यानिवृत्तौ सत्यां।

एवं सतीह जीवोयममनस्कः सदा न किम् ॥ 296.

अचिन्तक एवात्मा सर्व्वकालं प्राप्नोति न च अचिन्तकस्यात्मकत्वं सम्भावयितुं युक्तम् स्तम्भादिवद-चिन्तकत्वात्। तदेवं युक्त्या विचार्य्यमाणानां इन्द्रिय + + + + + + + + सम्भवात् स्वरूपसिद्धिरसती। यदि ह्येषां स्वरूपसिद्धिः स्यात् तदोपपत्त्या विचार्य्यमा[० ६][1]णा यथास्थितेन स्वरूपेण स्फुटतरमुपलभेरन्; न चोपलभ्यन्ते। तस्मात् स्वभावशून्या इति सिद्धम्। यदि, तर्ह्येषां स्वभावो नाम नास्ति तत्कथमेषा विशेष-परिच्छेदात्मिका संज्ञा पदार्थविशेषव्यवस्थाहेतुत्वेनोपदिश्यते। उच्यते। सत्सु पदार्थेषु तद्विशेषपरिच्छेदा-त्मिका संज्ञा स्यात्। तेषाञ्च पदार्थानामसत्त्वं प्र + + + + + + + + + + स्वरूपसिद्धिः स्यात् किं खल्वेष विषयपरिच्छेदः सर्व्वथा नास्ति, न नास्तीति स्वभाव[२]स्य विद्यमानत्वात्। तथाहि

मनसा गृह्यते योऽर्थः पूर्व्वदृष्टो मरीचिवत्।
सर्व्वधर्म्मव्यवस्थासु स संज्ञास्कन्धसंज्ञकः ॥ 297.

इह चक्षुः प्रतीत्य रूपञ्च, चक्षुर्विज्ञानमुत्पद्य, निरुध्यमाणं, सहेन्द्रियविषयैर्निरुध्यते। तस्मिन्निरुद्धे पूर्व्वदृष्टो योऽर्थः स एव पश्चान्मनसा गृह्यते, कथं पुनरसन्निहितस्य ग्रहणं संभाव्यत इत्याह। + + + + + + + + चिकायां जलमस्ति। अपि च हेतुप्रत्ययवशात् प्रवर्त्तत एव जलाकारसंज्ञा एवमविद्यमा[३]न-स्वरूपेपि पूर्व्वगृहीतेऽर्थे मरीच्यामिव यद्विकल्पकं विज्ञानमुत्पद्यते तत् सर्व्वधर्म्मव्यवस्थाकारणम्। सर्व्वधर्म्मव्यवस्थाकारणत्वाच्च स एव संज्ञास्कन्ध इत्युक्तः तथाविधसंज्ञाविशेषसंप्रयोगात् संज्ञावशेन च सर्व्व-धर्म्मव्यवस्था विज्ञातव्या, न पुनः पदार्थस्वरूपनिबन्धना, स्वभावस्य सर्व्वथाऽयुज्यमानत्वात्। यद्येवमस्ति तर्हि स्वभावतः संज्ञास्कन्धः। न हि तस्मिन्नसति सर्व्वधर्म्मव्यव[४]स्था शक्या कर्त्तुमिति। उच्यते। सापि हि

1 [Leaf 27 of the MS.]

संज्ञा विज्ञानसंप्रयुक्तत्वात् विज्ञानव्यतिरेकेणामतो । तदपि च विज्ञानं संज्ञाव्यतिरेकेनासिद्धत्वात् स्वरूपतो नास्ति। यस्मात्

चक्षुः प्रतीत्य रूपञ्च मायावत् जायते मनः ।

न हि तद्विज्ञानमुत्पादात् प्रागस्ति यदुत्पत्तिक्रियाश्रयत्वेन प्रवर्त्तेत, सत्स्वपि चक्षुरादिषु प्रत्ययेषु विज्ञानस्य स्वरूपासम्भवात् । उत्पत्तिक्रियाया अप्रवृत्तेरुत्पादो [५] न युज्यते । उत्पद्यते चैतद्विज्ञानमित्यतः किं निस्वेतुं पार्य्यते, अन्यच्च मायाधर्म्मतायाः । उक्तं हि भगवता, तद्यथा भिक्षवः मायाकारो वा माया-कारान्तेवासी, चतुर्म्महापथे विविधं मायाकर्म्म विदर्शयेत्तद्यथा हस्तिकायं रथकायं पत्तिकायं तं चक्षुष्मान् पुरुषः पश्येत् निध्यायेत् योनिशश्चोपपरीक्षेत तस्य तं पश्यतो निध्यायतो योनिशश्चोपपरीक्षमाण[६]स्य असतो-ऽप्यस्य ख्यायात् रिक्ततोऽपि तुच्छतोऽपि असारतोपि । तत्कस्य हेतोः ? किमस्मिन् मायाकृते सारमस्तीति । एवमेव यत्किञ्चिद्विज्ञानं अतीतानागतप्रत्युत्पन्नम् आध्यात्मिकं वा बाह्यम्वा औदारिकम्वा सूक्ष्मं वा हीनं वा प्रणीतम्वा यद्वा दूरे यद्वा अत्यन्तिके तद्भिक्षुः पश्येत् निध्यायेत् योनिशश्चोपपरीक्षेत तस्य तत् पश्यतो निध्यायतो योनिशश्चोपपरीक्षमाणस्य अ[७]सतोऽप्यस्य ख्यायात् रिक्ततोपि तुच्छतोपि असारतोपि रोगतोपि गण्डतोपि शल्यतोप्यघतोपि अनित्यतोपि दुःखतोपि शून्यतोप्यनात्मतोपि अस्य ख्यायात् । तत्कस्य हेतोः ? किमस्मिन् विज्ञानस्कन्धे सारमस्तीति । यथोपलभ्यते विचार्य्यमाणस्य तथा स्वरूपासम्भवात् मायायुवतिप्रख्यं विज्ञानमिति शक्यमवसातुं । ततश्च सूक्तमेव तच्चक्षुः प्रतीत्य रूपञ्च मायावज्जायते मन इति । य[८]दि पुनरस्य स्वरूपं स्यात् तदा स्वरूपतो

विद्यते यस्य सद्भावः स मायेति न युज्यते ॥ 298.

न हि लोके स्वभावात् शून्या सम्भूता स्त्री मायेति युज्यते । एवं विज्ञानमपि स्वरूपतो विद्यमानत्वात् मायोपमं न स्यात्, उपदिश्यते च मायोपमं विज्ञानमतो निःस्वभावं विज्ञानं, यदा च निःस्वभावं विज्ञानं, तदा निःस्वभावविज्ञानसंप्रयुक्ता संज्ञा निःस्वभावा इति स्थितम् । अत्राह । आश्चर्य्यमेतच्चक्षुरिन्द्रियाणां कथ-[१७क]मपि विषयग्र[ह]णं सम्भाव्यते उत्पद्यते चक्षुः प्रतीत्य रूपाणि च विज्ञानमिति । उच्यते किमे-तदेवाश्चर्य्यं त्वया दृष्टं इदं किं नाश्चर्य्यं यत्र निरुद्धान्नानिरुद्धात् वीजादङ्कुरोदयो युज्यते, उत्पद्यते च वीजं प्रतीत्याङ्कुरः । तथा कृतस्योपचितस्य कर्म्मणो निरुद्धस्य न क्वचिदवस्थानं सम्भवति । कल्पशतसहस्रान्तरित-निरोधादपि कर्म्मणः साक्षादुत्पद्यत एव फलं । घटादयश्च स्वकारणात्तत्त्वान्यत्वेन विचार्य्यमा[२]णा न सम्भवन्ति तथाप्युपादाय प्रज्ञप्त्या मधूदकादीनां सन्धारणाहरणादिक्रियानिष्पादनयोग्या भवन्ति । तदेवं

यदा न किञ्चिदाश्चर्य्यं विदुषां विद्यते भुवि ।

इन्द्रियाणां गतावेवं तदा को नाम विस्मयः ॥ 299.

कार्य्यं हि स्वकारणमनुविदधद् दृश्यते; गो गौः, अश्वादश्वः, शालेः शालिरित्यादीनां भूतानां रूपशब्दादीनाञ्च विधिरेष न दृश्यते । तथा हि कायेन्द्रियग्राह्यत्वात् महाभूतान्यचा[३]क्षुषाणि अश्राव-णानि तेभ्यश्चाक्षुषं रूपं श्रावणः शब्द उत्पद्यत इति; परमेतदाश्चर्य्यं । एवं घ्राणादिविषये चक्षुरादिषु च योज्यं । अथवा नैवेयमिन्द्रियाणामर्थगतिर्विस्मयकारणम् यदि हीन्द्रियाणामेव केवलमर्थगतावेतत् वैचित्र्यं

स्यात् तदेतद्विस्मयस्थानम्। यदा तु सर्व्वमेव यथोदितेन न्यायेन जगद्विदुषां विस्मयकरं इन्द्रजाल[४]मिव तदा नेदमाश्चर्य्यं। प्रदेशवृत्तिर्हि किञ्चिदसम्भावनीयमुपलभ्यमानं विस्मयकरं जायते, न सर्व्वत्रैव तुल्यरूपं। न ह्यग्नेरौष्ण्यं विस्मयायेति। अतएवानियतस्वरूपत्वात् यथाप्रत्ययं तथा तथा विपरिवर्त्तमानत्वाद्विदुषां।

अलातचक्रनिर्म्माणस्वप्नमायाम्बुचन्द्रकैः।
धूमिकान्तःप्रतिश्रुत्कामरीच्यभ्रैः समो भवः ॥ 800.

यथा सजलस्येन्धनस्याशु[५]भ्राम्यमानस्य तद्गतदर्शनविपर्य्यासनिबन्धनत्वाच्चक्राकारोपलब्धिर्भवति। न च तत्रास्ति चक्रस्वरूपलेशोऽपि। यथा च निर्म्माणानि समाधिविशेषप्रत्ययसम्भूतानि विचित्रक्रियाविशेषनिष्पादनात् सद्भूतयोगिसंज्ञादर्शनमनोविपर्य्यासादुत्पादयन्ति; ते तु चित्तचैत्तेन्द्रियरहितत्वात् न सद्भूता योगिनाम्। यथा च मिद्धसंप्रयुक्तविज्ञानसमा[६]युक्तात्मभावप्रत्ययः स्वप्नात्मभावो जाग्रदात्मभाव इव आत्मनि स्नेहविपर्य्यासनिबन्धनः; स चासद्भूतः प्रबुद्धस्य तथा दर्शनाभावात्। यथा च मायाकारयन्त्रनिबन्धना मायाकृतयुवतयस्तत्स्वरूपानभिज्ञानां चित्तमोहनपरा एव सद्भूतस्त्रीशून्या जायन्ते। यथा च जलचन्द्रः सद्भूतचन्द्रशून्यः प्रतीत्यसमुत्पादबलात् तथोत्पद्यमानः चन्द्रवि[७]पर्य्यासनिबन्धनो भवति बालानां। यथा च प्रतीत्यसमुत्पादबलादेव तथाविधकालदेशनिमित्तानि प्रतीत्य धूमिका जाता विदूरस्थानां सद्भूतधूमविपर्य्यासनिबन्धना भवति। यथा च गिरिगह्वरोदरादीनां अन्तः प्रतिश्रुत्का प्रतीत्य जायमाना सद्भूतशब्दाभिमानं जनयत्यविदुषाम्। यथा च मरीचिका देशकालविशेषसन्निहितादित्यरश्मिप्रत्यया जलस्वरूपविविक्ता विदूरस्था[८]नां जलविपर्य्यासं जनयति। यथा चाभ्राणि विदूरतः पर्व्वताद्याकारं विपर्य्यासमुपजनयन्ति एवमविदुषां यथावत्प्रतीत्यसमुत्पादस्वभावाकुशलानां अविद्याविपर्य्यासाक्षिप्तकर्म्मप्रत्ययो विज्ञानादिजन्मसागरः स वाह्येन भाजनेन + + + + + + + + + + + मृषामोषधर्म्मकः स्वभावशून्य एव सन् बालजनविसम्वादकः प्र[१७][1]तिभाति। विदितधर्म्मस्वभावास्तु सर्व्वत्रैव सङ्गपरि + + + + + + + भवन्तीति। स्थितमेतत् अलातचक्रादिवत् निःस्वभावः संसार इति।

## बोधिसत्त्वयोगाचारे चतुःशतके इन्द्रियार्थप्रतिषेधोनाम त्रयोदशं प्रकरणं समाप्तम्।

अत्राह यदि प्रतीत्य समुत्पन्नत्वात् अलातचक्रादिवन्निःस्वभावो भवः कस्य तर्हीदानीं स्वभावोऽस्तु। न कस्यचित् पदार्थस्य स्वभावः शक्यः कल्पयितुम्। तथाविधस्य पदार्थस्य सर्व्व[२]थानुपलभ्यमानत्वात्। तथा हि ॥

आयत्तं यस्य भावस्य भवेन्नान्यत्र कुत्रचित्।
सिध्येत् तस्यास्तिता नाम क्वचित् स च न विद्यते ॥ 801.

यदि हि कस्यचित् पदार्थस्य निष्पत्तौ क्वचित् किञ्चिदायत्त न स्यात् तदा अस्य अपरायत्तस्य, स्वतन्त्रस्य स्वत एव व्यवस्थितत्वात् स्वभावतोऽस्तित्वं कल्पयितुं युक्तं। न त्वेष सम्भवोऽस्ति यद्धेतुप्रत्ययायत्तजन्मनां परायत्तता न स्यात्। अहेतुको वा पदार्थः कश्चित् सम्भवेदिति। यतस्त्वेवं निर्हेतु[३]क[त्व]प्रसङ्गात्

[1] [Leaf 28 of the MS.]

कस्यचित् पदार्थस्य क्वचित् स्वरूपमस्ति। तस्मात् नास्ति कस्यचित् स्वभावः, स्वभावाभावात् च अलात-चक्रवत् नास्ति स्वभावसिद्धिरिति स्थितम्। यदि च अमी पदार्था अलात-चक्रादिवत् विसम्वादकाः विसम्वादकत्वादवस्तुका न स्युस्तदा नियतमुपपत्त्या विचार्य्यमाणा जातरूपादिवत् स्पष्टतरमुपलभ्यमानस्वरूपाः स्युः। न चैते विचाराग्निसन्तापिता विपर्य्यासनिवन्धनत्वात् स्वरूपा[४]भावं नासादयन्ति। न हि वस्तुप-पत्त्यापि युज्यते, सर्व्वथा तस्य विसम्वादकत्वात्। अत एवाचार्य्यो वस्त्वभिनिवेशशिथिलीकरणाय अतःपरं यथा च घटादीनां स्वरूपं न सम्भवति तथोपपत्तिमाह।

रूपमेव घटो नैक्यं घटो नान्योस्ति रूपवान्।
न विद्यते घटे रूपं न रूपे विद्यते घटः ॥ 802.

इह यदि घटो नाम कश्चित् पदार्थः स्यात्, स दर्शनेन्द्रियग्राह्यत्वात् रूपाद्भेदेन वा परिकल्पि[५]तोऽभेदेन वा, तत्र तावत् रूपमेव घटो नेकं न यदेव रूपं स एव घटः इति रूपघटयोरैक्यं न भवति। यदि हि रूपघटयोरैक्यं स्यात् तदा यत्र यत्र रूपं तत्र तत्र [घट इ]ति सर्व्वत्रैव रूपे घटः स्यात्। पाकजगुणोत्पत्तौ रूपविनाशे घटविनाशः स्यात्। न चैतत् सम्भवतीति रूपमेव घट इति नास्त्येकत्वम्। अथैतद्दोषपरिजिहीर्षया रूपादन्यो घटो रूपवान् प[६]रिकल्प्येत। तत् यथार्थान्तरभूतै र्गोभि र्गोमान् देवदत्त इत्येतदप्ययुक्तम्। यस्मात् घटो नान्योस्ति रूपवान् यदि रूपादन्यो घटः स्यात् स्वरूपनिरपेक्षो गृह्येत, न हि गोभ्यो व्यतिरिक्तो देवदत्तो गोव्यतिरेकेण न गृह्यते तद्वत् घटोऽपि रूपनिरपेक्षो गृह्येत। न च गृह्यते इत्यतो रूपव्यतिरिक्तो घटो नास्ति। यदा च नास्ति तदा कथमसम्विद्यमानस्तद्[७]त्तया गृह्येत। न ह्यविद्यमानो वन्ध्यातनयो गोमानिति व्यपदिश्यते। एवं रूपवान् घट इत्यपि न युज्यते। अन्यत्वा-सम्भवादेव च रूपघटयो राधाराधेयकल्पनाया अपि नास्ति सिद्धिरिति "न विद्यते घटे रूपं न रूपे विद्यते घटः।" रूपघटयोरन्यत्वे सति घटे रूपं इति स्यात् कुण्ड इव दधि, रूपेऽपि घट इति स्यात् कट इव देवदत्तो, न चैतत् सम्भवतीति नास्ति [७] घटः स्वभावतः। यस्य च नास्ति स्वभावः, उपलभ्यते च तदलातचक्रादिवत् स्वभावशून्यं। अपि च यथा आत्मा स्कन्धा न भवति कर्त्तुरात्मनः कर्म्मणश्चोपादान-स्यैकत्वप्रसङ्गात् स्कन्धवच्चोदयव्ययभाक्त्वप्रसङ्गात्, आत्मबहुत्वप्रसङ्गाच्च। एवं घटोपि रूपं न भवति। उपादानोपादात्रोरेकत्वप्रसङ्गात्। + + + + + + घटबहुत्वप्रसङ्गात्। यथा च आत्मा स्कन्धेभ्योऽन्यो न भवति पृथग्ग्रहणप्रसङ्गात् निर्हेतु[८]कत्वप्रसङ्गाच्च। एवं घटोपि रूपव्यतिरिक्तो न भवति पृथग्ग्रहण-प्रसङ्गात् निर्हेतुक[त्व]प्रसङ्गाच्च। यथा चात्मा स्कन्धेभ्यस्तत्त्वान्यत्वकल्पनाभावात् स्कन्धवान् आत्मेति न व्यपदिश्यते। तद्वदेव रूपघटयोस्तत्त्वान्यत्वकल्पनाभावात् रूपवान् घट इति न व्यपदिश्यते। यथा च स्कन्धेभ्यो + + + + + + + + + + स्कन्धेष्वात्मा इति द्विधापि न युज्यते, एवं घटे रूपं रूपे घट इत्यपि कल्प[२८ क]नाद्वयं नोपपद्यते। यथा च रूपापेक्षया घटे कल्पनाचतुष्टयं न सम्भवत्येवं सर्व्व-प्रज्ञप्तिकारणापेक्षं चतुष्टयं न सम्भवतीति नास्ति स्वरूपतो घटः। यथा च घटः स्वभावतो नास्ति तथा सर्व्वभावा अपि स्वभावतो मृग्यमाणाः न सन्तीति सिद्धा भवत्यलातचक्रादिप्रख्यता भवस्य। अत्राङ्कुरेके यद्यपि रूपघटयोः + + + + + + + + + + [घ]टयोरन्यत्वमस्ति यस्मादन्य एव घटोऽस्माकमन्यथैव

च सत्ता। सत्ता हि नाम महासामा[१]न्यं घटश्च विशेषो द्रव्यं सत्तायोगात् सदिति व्यपदिश्यत इति तान् प्रत्युच्यते।

वैलक्षण्यं द्वयो र्दृष्ट्वा भावादन्यो घटो यदि।
घटादन्यो न भावोपि किमेवं न भविष्यति॥ 303.

घटादिद्रव्याणामनुप्रवृत्तिलक्षणत्वात् सामान्यो भावः। व्यावृत्तिलक्षणत्वाच्च घटो विशेषलक्षणः इति। यदि तयो र्वैलक्षण्यं भावघटयोर्दृष्ट्वा भावादन्यो घटो भवति। एवमेव वैलक्षण्यात् घटादपि किमर्थं भावोऽन्यो न भवि[२]ष्यति। ततश्चान्यबुद्धिध्वनिप्रवृत्तिनिमित्तमन्यत्वमपरमनुप्रवृत्तिलक्षणं न कल्पयितव्यम्। वैलक्षण्यादेव अन्यबुद्धिध्वनिप्रवृत्तिसिद्धेः कल्प्यते चापरमन्यत्वं इति नास्ति। तर्हि भावघटयोर्वैलक्षण्यापेक्षमन्यत्वम् ततश्च यदुक्तं।

वैलक्षण्यं द्वयोर्दृष्ट्वा भावादन्यो घट इति

तत्र यथा च भावोऽनुप्रवृत्तिलक्षणत्वाद्घटादन्य एवमन्यत्वमप्यनुप्रवृत्तिलक्षणत्वात् घटा[४]दन्यत् स्यात्। न च तस्यान्यत्वस्यापरमन्यत्वं अन्यबुद्धिध्वनिप्रवृत्तिनिमित्तमस्ति। यदि स्यादन्यत्वानामपर्यवसानदोष स्यात्। अथ विनैवान्यत्वेन अन्यबुद्धिरन्यत्वे भवति तद्वदेवान्यत्रापि सम्भाव्यतामित्यलमन्यत्वेनाकिञ्चित्करेण-परिकल्पितेन। असति चाऽन्यत्वे नास्ति कुतश्चित् कस्यचित् अन्यत्वमिति सिद्धम्। अपि चेदं चिन्त्यते किम्भूतायाः सत्ताया अन्यत्वेन योगो[५]ऽस्तु। किमन्यभूताया अनन्यभूताया वा। यद्यन्यभूतायास्तदा व्यर्थोऽन्यत्वेन योगः। अथानन्यभूताया एवमपि विरुद्धेन अन्यत्वेन योगात् अन्यत्वेन योगो न प्राप्नोति। अन्यत्वाभावाच्च घटादन्यो भाव इति न युज्यते। ततश्च लोके विपर्यासं प्रमाणीकृत्य घटत्वरूपमेव सद्बुद्धि-ध्वनिप्रवृत्तिनिमित्तत्वात् भाव इति व्यवस्थाप्यते। तस्य च [६] रूपाच्चतुर्धाविचार्यमाणस्य नास्ति स्वभाव इति तत्त्वविदपेक्षयालातचक्रादिवत् स्वभावशून्यो घट इति सिद्धम्। अत्राह। विद्यत एव घटो गुणाश्रयत्वात् न ह्यसत् गुणाश्रयो दृष्टः। भवति च गुणाश्रयो घटः एको घटो द्वौ घटाविति। एकत्वादयो गुणपदार्थसंगृहीता घटाश्च द्रव्यम्। द्रव्याश्रयित्वञ्च गुणानां सम्भवतीति [७] अतो गुणाश्रयत्वादस्त्येव घट इति। अत्रोच्यते। लन्मतेन॥

एको यदि घटो नेष्टो घटोप्येको न जायते।

पदार्थभेदात् यदि एको घटो न भवतीति मन्यसे घटोपि तर्ह्येको न भवति यथैकत्वं एकसंख्या घटो न भवति एवं द्रव्यत्वेनैकसंख्यायाः पृथग्भूतत्वात् घटोप्येको न भवति। द्वित्वादिति भावः। अपि च अस्य घटस्य एकरूपस्य च एकसंख्यापरिकल्पे वा[८]नेकरूपस्य वा? यद्येकरूपस्य तदा व्यर्थैवैकत्वकल्पना। अथानेकरूपस्य तदापि विरुद्धत्वादयुक्तैव। तस्माल्लोके घटस्वरूपस्यैव असन्निहितार्थान्तरस्य एककल्पना विज्ञेया। अथ द्रव्याश्रयिणो गुणा इति कृत्वा एकत्वयोगात् घट एवैको भवति न त्वेकत्वं स्वार्थं भवति। अत्रोच्यते॥

न चायं समयोर्योगः तेनाप्येको न जायते॥ 304.

योगो नाम समयोरेव भवति, [२८] [1]न विषमयो स्तत्रैकगुणो दृष्टो घटस्य द्रव्यं द्रव्यगुणयोश्च समता यस्माच्च भवति तस्मात् तयोर्योग एव न भवति योगाभावात् तत्र यदिष्टमेकत्वयोगात् घट एवैको भवतीति तन्न। यदि चात्र योगो दृष्टः तदा एकेनापि घटस्य योगः स्यात् घटेनाप्येकस्य। स च नैवं भवतीति योग एवानयोर्नोपपद्यते। योगाभावाच्च नैवैको घटो भवतीति न घटोऽप्येक इति। तदत्र पूर्व्वार्द्धेन कारिकाया यो[१]गमभ्युपेत्य दूषणमुक्तं, उत्तरार्द्धेन तु योगासम्भवे दूषणमुक्तं। अपिशब्दस्य दूषणकारणसमुच्चयार्थो द्रष्टव्यः। अपि चेदमयुक्ततरं परसमये दृश्यते यत् द्रव्याश्रयिणो गुणा व्यवस्थाप्यन्ते न गुणाश्रयिणो विशेषगुणाः। युज्यते च गुणानामपि गुणाश्रयित्वम्। इह यत्परिमाणो घटस्तदाश्रयेणापि रूपेण तावतैव भवितव्यम्। ततश्च द्रव्यवद्रूपस्यापि महत्त्वं प्राप्नो[२]तीति।

यावद्द्रव्यं यदा रूपं तदा रूपं महन्न किम्।

यदा यावद्द्रव्यं यावान् द्रव्यस्यायामविस्तारात्मकः सन्निवेशः तावत् रूपं रूपस्यापि तावानेवायामविस्तारात्मकः सन्निवेशः इति परेणाभ्युपगम्यते। तदा नियतमणुमहति द्रव्ये रूपेणापि तत्राणुमहता भवितव्यम्। तत् किं न खल्वत्र कारणम् यत् द्रव्यरूपस्य अणुमहत्त्वे नेष्येते। अथ स्यात् रू[४]पं गुणोऽणुत्वं महत्वमपि च गुण एव न च गुणे गुणस्य सन्निवेशो भवतीति समय एषोऽस्माकम्। ततश्च यद्यपि यावद्द्रव्यं रूपमपि तावदेव, तथापि सिद्धान्तविरोधभयात् रूपस्याणुत्वमहत्वे न स्त इति। उच्यते॥

समयो जायते वाच्यः प्रतिवाद्यपरो यदि॥ 305

यदि हि तव स्वयूथ्य एव प्रतिवादी स्यात् तन्निवर्त्तयितुं युक्तं तव सिद्धान्ताभिधानम् तस्य तद्बाधि[५]तुमसामर्थ्यात्। यदा तु प्रतिवादी परस्तं प्रति सिद्धान्तविरोधोद्भावनमकिञ्चित्करम् सिद्धान्तनिराकरणप्रवृत्तत्वात्तस्य। युक्तिलोकविरोधोद्भावनन्तु तं प्रति न्यायः, तद्द्वारेण तस्य निवारयितुं शक्यत्वात्। तस्मादपरिहार एवायं यदिदमागमविरोधोद्भावनमिति स एवाविचलो दोषः। इति नास्ति भावघटयोरन्यत्वम्। तदत्र, [६] सत्तान्यत्वप्रतिषेधेन अन्येषामपि घटत्वादीनां सामान्यविशेषाणां प्रतिषेधो विज्ञेयः। संख्यावत् सामान्यगुणानां महत्ववद्विशेषाणामिति। अत्राह। उक्तो भावस्य पटादिभ्योऽन्यत्वप्रतिषेधः घटस्य तु स्वभावाप्रतिषेधादस्त्येव स्वरूपतो घटाख्यो भाव इति। अत्रोच्यते—

लक्षणेनापि लक्ष्यस्य यत्र सि[७]द्धिर्न विद्यते।
संख्यादिव्यतिरेकेण तत्र भावो न विद्यते॥ 306.

इह घटसत्वयोर्व्यावृत्त्यनुवृत्तिलक्षणं ब्रुवता घटस्य व्यावृत्तिलक्षणं व्यवस्थापितं परेण। तदमुना लक्षणेनापि लक्ष्यस्य नास्ति सिद्धिः। नहि व्यावृत्तिमात्रेण शक्यं वस्तुस्वरूपं निर्द्धारयितुं यल्लक्ष्यतया सेत्स्यति। एकस्तावत् गुणत्वाद्घटो न भवति। अणुर्महदिति रूपादयश्च गुणत्वादेव घटा[८]ख्या न भवन्ति। सत्तापि द्रव्यगुणकर्म्मसु सामान्यात् घटो न भवति। तदयं संख्याणुमहद्रूपादिभ्यो व्यावर्त्तमान इत्थंस्वभाव इति न शक्यं व्यवस्थापयितुं। तदेवं। यत्र परवादिपक्षे लक्षणेनापि लक्ष्यस्य घटस्वरूपस्य नास्ति सिद्धिः तत्र पक्षे संख्यादिव्यतिरेकेण सिद्धस्वरूपेण घटाख्यो भावो न विद्यते। ततश्च स्वभावशून्यो घट इति सिद्धम्। [२०क]

---

[1] [Leaf 30 of the MS.]

अथवा संख्यारूपादयो घटस्य लक्षणम्। तैर्लक्ष्यमाणत्वात् घटो लक्ष्यस्तस्य लक्षणेनापि पृथक् स्वरूपसिद्धिरशक्या कर्तुम्। संख्यादिव्यतिरेकेण तत्स्वरूपस्यानुपलभ्यमानत्वात् यदि हि तल्लक्ष्यं स्वरूपं लभते तदा नियतं संख्यादिव्यतिरेकेण गृह्येत इदं तत् संख्याव्यतिरिक्तं घटस्वरूपमिदम्। पुनरस्य संख्यादिकं लक्षणमिति न चैतदेवमित्यतः।

लक्षणेनापि लक्ष्यस्य यत्र सिद्धिर्न विद्यते।
संख्यादिव्यतिरेकेण तत्र भावो न विद्यते॥

इ[२]ति नास्ति स्वभावतो घटः। उक्तस्तावल्लक्ष्यलक्षणयोरन्यत्वप्रतिषेधः। येषां तु रूपादिभिर्घटस्यैक्यमिति सिद्धान्तः, तत्प्रतिषेधायेदमुच्यते॥

घटस्य न भवत्यैक्यमपृथक्त्वाद्धि लक्षणैः।
एकैकस्मिन् घटाभावे बहुत्वं नोपपद्यते॥ 307.

रूपादीनि खलु नानालक्षणानि। येषां तैः पृथक्त्वं घटस्येष्टं तेषां रूपादिभिर्लक्षणैरपृथक्त्वं घटस्यैक्यं नोपपद्यते बहुभिरनन्यत्वात्। स्यात्तत्र मतं यदि घटस्यैक्यं न भवति [३] हन्त बहुत्वं प्राप्तमिति। अत्रोच्यते। यस्माद्रूपादिष्वेकैकस्मिन् घटस्याभावो दृष्टस्तस्माद्बहुत्वमपि नास्तीति। अत्राह। यदि रूपादिभिर्लक्षणैरपृथक्त्वात् घटस्यैक्यं नास्ति, तेषां परस्परसंयोगाद्घटस्यैक्यं भविष्यतीति। अत्रोच्यते।

न ह्यस्पर्शवतो नाम योगः स्पर्शवता सह।
रूपादीनामतो योगः सर्वथापि न युज्यते॥ 308.

तत्र स्पृष्टिः स्पर्शः कायेन्द्रियग्राह्यता स्पर्शोऽ[४]स्यास्तीति स्पर्शवत्। स्प्रष्टव्यमेव कायेन्द्रियग्राह्यत्वात् स्पर्शवत्। तेन स्पर्शवता स्प्रष्टव्येन रूपगन्धरसानामस्पर्शवतां योगः संयोगः संस्पर्शो न सम्भवति। यथा घटस्याकाशेन। यत एतत् एवं रूपादीनामतो योगः सर्वप्रकारं न सम्भवति। यदा च न सम्भवति तदान्योन्यसंस्पर्शकृताद्रूपादीनां विशेषात् समुदायनिबन्धनो घट इति यदुक्तं तन्न युक्तम्। अथ विना[५] प्यन्योन्यसंस्पर्शेन तत्समुदाय एव घट इति स्यात्, एतदपि नास्ति। यस्मात्॥

घटस्यावयवो रूपं तेन तावन्न तद्घटः।
यस्मादवयवी नास्ति तेन नावयवोपि तत्॥ 309.

रूपादिसमुदायरूपस्य घटस्य प्रत्येकं रूपादयोऽवयवभूतत्वात् घटव्यपदेशभाजो न भवन्ति। घटोऽवयवी, अवयवास्तु रूपादयः इति रूपन्तावत् अवयवत्वात् घटो न प्राप्नोति। यथा च रूपं एवं [६] गन्धादयो वाच्याः। ननु च रूपस्यावयवत्वादस्ति तत्संस्थावयवी नाम कश्चित्। न ह्यवयविनिरपेक्षा अवयवा युज्यन्त इति। उच्यते इह रूपादीनां प्रत्येकं घटत्वाभावे कुतः कश्चिदवयवी। न हि रूपादिव्यतिरेकेण अवयवी नाम परिच्छेत्तुं पार्यते। न चापरिच्छिद्यमानस्वरूपस्य सत्त्वमास्थातुं शक्यमित्यसन्नवयवी। यस्माच्चावयवी नास्ति तस्मात् रूपं अवयवत्वेनापि न सम्भाव्यत इ[७]ति न स्त एवावयवावयविनौ। इतश्च रूपादिसमुदायो न घटः। यस्मात्,

सर्व्वेषामपि रूपाणां रूपत्वमविलक्षणम् ।
एकस्य घटसद्भावो नान्येषां किन्न कारणम् ॥ 810

सर्व्वेषामपि रूपाणामिति रूपस्कन्धसंगृहीतत्वात् रूपगन्धादयो रूपाणीत्युच्यन्ते। तानि रूपाणि घट इव पटादिष्वपि सन्ति। न च तानि घटादिभेदेऽपि स्वलक्षणं व्यभिचरन्ति, सर्व्वत्रैव तुल्यलक्षणत्वात्। [८] तत्र यथैकस्य रूपस्य घटत्वेनावस्थानं तथान्यस्यापि घटादिसम्बन्धिनो रूपस्य कस्मात् घटत्वेनावस्थानं नेष्यते। युज्यते तु तस्यापि घटत्वेनावस्थानम् लक्षणाभेदात् घटावस्थितरूपादिवत्। एवं त्वनभ्युपगमे कारणमेव न सम्भवति। ततश्च सर्व्वेषामेव घटत्वं प्राप्नोति। यद्वा घटस्यापि घटत्वं न प्राप्नोति। यथा च घटादीनाम-भेदप्रसङ्गः। एवं रूपगन्धादीनामप्यभेदः प्राप्नोति ए[९]कस्मात् घटादनन्यत्वात्। अथ मन्यसे यद्यपि घटादन्यत्वमेषां रूपस्य रसादिभ्यो भेदोस्ति, तस्मादभेदप्रसङ्गाभावः इति। एतदप्ययुक्तमिति प्रतिपादयन्नाह।

रूपमन्यद्रसादिभ्यो न घटादिति ते मतम्।
स्वयं यस्तैर्विना नास्ति सोऽनन्यो रूपतः कथम् ॥ 811.

यदि भिन्नेन्द्रियग्राह्यत्वाद्रसादिभ्यो रूपमन्यद्व्यवस्थाप्यते। घटादपि तद्रूपमन्यत् इति किं न व्यवस्थाप्यते। रूपादन्येभ्यो रसादिभ्यस्तस्य व्यतिरि[३०][1]क्तत्वात् रसादिस्वात्मवत् रूपादन्य एव प्राप्नोति। न चान्यत्वमिष्यत इति अयुक्तमेतत्। यदा चैवं रूपादीनां घटकारणत्वं न सम्भवति तदा नियतं

घटस्य कारणं नास्ति ॥

न च कारणरहितस्य स्वत एव निर्हेतुकं कार्य्यत्वं सम्भवतीति।

स्वयं कार्य्यं न जायते ॥

यत एव चास्य निर्हेतुकं कार्य्यत्वं न सम्भवति।

रूपादिभ्यः पृथक् कश्चित् घटस्तस्मान्न विद्यते ॥ 312.

रूपादिव्यतिरेकेण कार्य्यभूतस्य घटस्यानुपलभ्यमानत्वात् नास्ति रूपादिव्यतिरिक्तो [२] घट इति सिद्धं। अथ मन्यसे नैव हि रूपाद्युपादानो घटः किं तर्हि स्वावयवानि कपालानि कारणान्यपेक्ष्य घटस्य कार्य्यत्वं कपालानां च कारणत्वमिति, एतदप्ययुक्तमित्युद्भावयन्नाह

घटः कारणतः सिद्धः सिद्धं कारणमन्यतः।
सिद्धिर्यस्य स्वतो नास्ति तदन्यत् जनयेत् कथम् ॥ 318.

यदि घटकारणानि कपालानि प्रतीत्य घटः सिध्यति, तानीदानीं कपालानि किमपेक्ष्य सिध्यन्ति। न हि तावत् तानि स्वभावसिद्धा[३]नि, निर्हेतुक[त्व]प्रसङ्गात्। अथ तेषामप्यन्यत् कारण-मिष्यते, न तर्हि कपालानां स्वरूपसिद्धिरस्ति, तेषामपि कारणान्तरशर्करिकापेक्षत्वात्। येषां च कपालानां स्वतः सिद्धिर्न भवति कथं तान्यन्यत् स्वरूपतः साधयिष्यन्ति इत्यतोऽप्यसन् घटः। यतश्चायं घटप्रतिषेधको विधिरेष एव सर्व्वकार्य्याणामसिद्धौ योज्यः। अत्राह। समुदितानां रूपादीनां घटाभि-धा[४]नात् न रूपादिवद्बहुत्वेऽपि घटबहुत्वप्रसङ्ग इति। तदप्ययुक्तं, समूहस्यैव असत्वात् तथा हि ॥

---

[1] [Leaf 31 of the MS.]

समवायेऽपि रूपस्य गन्धत्वं नोपपद्यते ।

समूहस्यैकता तेन घटस्येव न युज्यते ॥ 314.

समुदिता अपि रूपादयो न समुदायावस्थाः स्वं स्वं लक्षणं विजहति, ततश्च समुदायावस्थायां रूपस्य स्वरूपापरित्यागात् गन्धत्वं न सम्भवति। एवं अनेकाश्रयस्य समूहस्यैकत्वं न सम्भाव्यते। [५] स हि समुदायो रूपादिभ्यो न व्यतिरिक्तस्ते च रूपादयः परस्परतो भिद्यन्ते, रूपादिभ्यश्चाव्यतिरिक्तसमुदायः कथमेकः स्यात्। दृष्टान्तमाह घटस्येवेति, यथा

घटस्य न भवत्यैक्यमपृथक्त्वात् विलक्षणैरित्याद्युक्तं।

तथेहापि

समूहस्यास्ति नैकत्वमपृथक्त्वादिलक्षणैः।

इत्येवम्—

समूहस्यैकता तेन घटस्येव न युज्यते।

ततश्च समूहस्यासम्भवात् रूपादिसमूहेऽपि घटकल्पना न युक्ता यथोपवर्णितेन च विचारेण।

रूपादिव्यतिरेके[६]ण यथा कुम्भो न विद्यते।

वाय्वादिव्यतिरेकेन तथा रूपं न विद्यते ॥ 315.

रूपादिव्यतिरेकेण यथा कुम्भो न सिद्धः एवं कुम्भप्रज्ञप्त्युपादाना अपि रूपादयो वाय्वादिमहाभूतचतुष्टयव्यतिरेकेण न युज्यन्ते निर्हेतुकत्वप्रसङ्गात्। यथा च वाय्वादिव्यतिरेकेण रूपगन्धादेरसम्भवः। एवं महाभूतानां अन्योऽन्यव्यतिरेकेण सिद्ध्यभावात् रूपादिसिद्ध्यभावमु[७]द्भावयन्नाह ॥

अग्निरेव भवत्युष्णमनुष्णं दह्यते कथम्।

नास्ति तेनेन्धनं नाम तदृतेऽग्निर्न विद्यते ॥ 316.

इह अग्निर्दग्धा भूतत्रयं दाह्यं, तदेतदिन्धनाख्यं भूतत्रयं अग्निरेव दहति नान्यः। इन्धनमेव च दह्यते नान्यत्। तच्चेन्धनं यदि अग्निरुष्णं दहति तदा अग्निरेव तदुष्णं भवति, नेन्धनम्। अनुष्णस्यापि दाहासम्भवात्, अनुष्णमपि नेन्धनम्। तदेवं सर्वथापि दाह्यस्यासम्भवान्नास्ति तेनेन्धनं नाम यद्भूतत्रयात्मकं स्या[८]त्। यदा चैवमग्निव्यतिरेकेणेन्धनं नापरं सम्भवति तदा इन्धनाभावे निर्हेतुकोऽप्यग्निर्न सम्भवतीति तदृतेऽग्निर्न विद्यते। अत्राह। अनुष्णात्मकमेवेन्धनं काठिन्यादिरूपत्वात्। तच्चोष्णस्वभावेनाग्निनाभिभवादुष्णं भवति। उष्णं च सद्दह्यत इति। एवं अपि कल्प्यमाने इन्धनाख्यो अर्थः ॥

अभिभूतोऽपि यद्युष्णः सोऽप्यग्निः किं न जायते ॥ 317.

यद्यग्निनाभिभूतः इन्धनाख्योऽर्थोऽनुष्णस्वभावोऽप्युष्णो भवतीति कल्प्यते। [९] सोऽप्यग्निरस्तूष्णरूपत्वात्। ततश्च स एवेन्धनाभावः ॥

अथानुष्णपरोऽप्यग्नौ भावोऽस्तीति न युज्यते ॥

अथाभिभूतोऽप्यसावर्थोऽनुष्ण एवेष्यते। स तर्ह्यग्निः परोऽपि भावः इन्धनाख्यं भूतत्रयमुष्णविरुद्धत्वात् अनुष्णस्वभावं अग्नावस्तीति न युज्यते। ततश्च भूतत्रयरहितमग्निमात्रमेव स्यात्। न चैषां महाभूतानामन्योन्यं

विनाभावः। यदि स्यात्, सिद्धान्तविरोधश्च स्यात् अग्नौ चापरस्य पदार्थस्येन्धनाख्यस्या[३१क]भावात् निर्हेतुकत्वञ्चाग्नेः स्यादित्ययुक्तमेतत्। अथ मन्यसे तेजोद्रव्यपरमाणौ भूतत्रयस्याभावात् विनापीन्धनेनास्ति एवाग्निरिति। उच्यते ॥

इन्धनं यद्यणोर्नास्ति तेनास्त्यग्निरनिन्धनः ॥

ततश्च स एव निर्हेतुकदोषः, अतएव चाहेतुकदोषप्रसङ्गात् वैशेषिकाणामिव स्वयूथ्यानामयुक्तो द्रव्यपरमाण्वभ्युपगमः। वैशेषिकपरमाणुवादश्च नवम एव प्रकरणे निषिद्धत्वात् न पुनर्निषिध्यते यथा अग्नेरहेतुकत्वप्रसङ्गभीत्याणावि[२]न्धनस्वभावः परिकल्प्येत ॥

अणुरेकात्मको नास्ति स्यात्तस्यापीन्धनं यदि। 318.

यद्यणोरिन्धनमस्तीति कल्प्यते न तर्हि तेजोद्रव्यपरमाणुरेकरूपोऽस्ति इत्यभ्युपेयं। न च केवलं परमाणोरेवैकात्मकस्याभावः। अष्टानां द्रव्याणां सहोत्पादनियमादपि खलु तदन्यस्यापि पदार्थस्य ॥

तस्य तस्यैकता नास्ति यो योभावः परीक्ष्यते।

यथा भूतानामेकात्मकत्वं नास्ति, तदितरस्मिन्नितरसद्भावात्; एवं भौ[३]तिकमपि केवलं नास्ति भूतैर्विनाऽहेतुकत्वप्रसङ्गात्। एवं चित्तेन विना चैत्ता न सम्भवन्ति। नापि चैत्तैर्विना चित्तम्। तथा लक्षणै-र्जात्यादिभिर्विना लक्ष्यं रूपादिकं नास्ति, नापि लक्ष्येण विना निराश्रयं लक्षणं सम्भवति। यतश्चैवमेकस्य पदार्थस्य कस्यचित् सिद्धिर्नास्ति, तदा एककाणां समुदायाभावे सति अनेकसिद्धिरपि दूरोत्सारितैवेत्याह ॥

न सन्ति तेनानेकेऽपि येनैको[४]ऽपि न विद्यते। 319.

एकस्यापि सिद्धौ सत्यां समुदितानामपि नास्ति सिद्धिः। अथ स्यात्? स्वयूथ्यं प्रत्येव एतद्दूषण-मुपपद्यते। सहोत्पादनियमाभ्युपगमात् परं प्रति तु नेदं दूषणम् नित्यानां पृथिव्यादिपरमाणूनां तदितर-भावसद्भाववियुक्तानां अस्तित्वेनाभ्युपगमात्। इति तत्राप्ययुक्ततामुद्भावयन्नाह ॥

भावास्त्रयो न सन्त्यन्ये तत्रैकोस्तीति चेत् मतम् ॥

एतदप्यसम्यक्। [५] किं कारणम् ॥

त्रित्वं येनास्ति सर्व्वत्र तेनैकत्वं न विद्यते ॥ 320.

परस्यापि हि न कश्चित् एको नाम पदार्थोऽस्ति। यस्मात् तत्रापि पृथिवीपरमाणौ द्रव्यत्वमेकत्वं सत्त्वम् चेत्येतत् त्रितयमस्ति। तथा गुणे गुणत्वं सत्त्वमेकत्वञ्चेति यस्मात् त्रितयमस्ति तस्मात् न कश्चित् एको नाम पदार्थोऽस्ति। तथा साङ्ख्यस्य त्रिगुणात्मकं सर्व्वमित्येकः कश्चित् पदार्थो ना[६]स्तीति न कश्चिदुक्तं दूषणं इति वर्त्तते। अपि चायं दूषणमार्गः सर्व्वेषामेव वादिनां पक्षनिराकरणाय विदुषा प्रयोक्तव्य इति शिक्षयन्नाचार्य्य आह ॥

सदसत् सदसच्चेति सदसन्नेति च क्रमः।

एष प्रयोज्यो विद्वद्भिरेकत्वादिषु नित्यशः ॥ 321.

एकत्वं अन्यत्वं उभयं नोभयं इत्येकत्वादयः। एतेष्वेकत्वादिषु पक्षेषु वादिना व्यवस्थितेषु स[७]द-सत्त्वाद्युपलक्षितो दूषणक्रमः स्वधिया यथाक्रममवतार्यः। तत्र सत्कार्य्यवादिनः कार्य्यकारणयोरेकत्वमिति

पक्षः। तस्य हि कारणात्मना तत्कार्य्यं व्यवस्थितमेव सत्कार्य्यात्मना विपरिणमते। न ह्यसत् शक्यं कर्त्तुं। यदि ह्यसन्नुत्पद्येत तदा सर्व्वतः सर्व्वसम्भवः स्यान्न च सर्व्वतः सर्व्वसम्भवो दृष्टः चौरादेरेव प्रतिनियतदध्यादिदर्शनात्। तदस्य वादिनः कार्य्यकारणयोरेक[८]त्वाभ्युपगमात् सदेव कार्य्यमुत्पद्यत इत्येवमेकत्वपक्षः। तस्मिन्नेकत्वपक्षे सत्कार्य्यवादपरामर्शेन नित्यं दूषणमभिधेयम्। तच्चोक्तम्॥

स्तम्भादीनामलङ्कारो गृहस्यार्थे निरर्थकः।

सत्कार्य्यमेव यस्येष्टमित्यनेन। तथा

सम्भवः क्रियते यस्य प्राक्सोऽस्तीति न युज्यते॥

सतो यदि भवेज्जन्म जातस्यापि भवेद्भवः।

धर्म्मो यद्यक्ततोऽप्यस्ति नियमो जायते वृथा॥

अथ,—[२१]

म्भवः[1] ।

जायमानो न तस्यास्ति स्यात्तस्याप्यन्तरं यतः ॥ 343.

यस्य वादिनोऽन्तरेण विना मध्यं विना अतीतानागतस्य द्वयस्य नास्ति सम्भवः । + + + + + + जायमानो नास्ति । कथं कृत्वा "स्यात् तस्याप्यन्तरं यतः" यथा जायमानस्यातीतानागतान्तर्व्वर्त्तित्वं । एवं तस्यापि जायमानस्य जाताजातरूपस्य मध्येन भवितव्यम् । यदपेक्ष्य जाताजातव्यवस्थानं स्यात् तच्चैतदशक्यम् । जाताजातयोरन्तरा तृतीयं जायमानं नाम व्यवस्थापयि[२]तुं सर्व्वत्रैव जाताजातयोरन्तरा जायमानकल्पनानवस्थाप्रसङ्गात् । अत्राह । नैवार्द्धजातो जायमानो यतो यथोपवर्णितदोषप्रसङ्गः स्यात् । किन्तर्हि यस्य निरोधे जातः पदार्थो भवति स जात(तः) प्रागवस्थारूपोर्थो जायमान इत्युच्यत इति तदेव प्रतिपादयन्नाह ।

जायमाननिरोधेन जात उत्पद्यते यतः ।

ततोऽन्यस्यापि सद्भावो जायमानस्य दृश्यते ॥ 344.

यस्माज्जायमाननिरो[३]धेन जातः पदार्थो भवति । तस्मादर्द्धजातव्यतिरेकेणापि अस्त्येव जायमानः पदार्थ इति । अत्रोच्यते ।

जातो यदा तदा नास्ति जायमानस्य सम्भवः ।

यदा तावदयं पदार्थो जात इत्युच्यते तदा जायमानं नास्ति । जायमानासम्भवाच्च जात इत्येवं नास्ति । अतो जातेन जायमानोऽनुमीयेत । अथ जातोऽपि जायमानः स्यात् । तस्य तद्वत्पादासम्भवो जा[४]तत्वादिति प्रतिपादयन्नाह ।

जात उत्पद्यते कस्मात् जायमानो यदा तदा । 345.

यदा जात एवार्थो जायमान इत्युच्यते । तदा स जायमानोऽर्थः कस्मादुत्पद्यत इति परिकल्प्यते । सिद्धत्वादुत्पादपरिकल्पोऽस्य न युक्त इत्यभिप्रायः । ततश्च जायमानो जायत इति न युज्यते, अत्राह । जन्माभिमुखत्वादजातोऽपि जायमानो जात इत्युच्यते । ततश्च जात एव जाय[५]मानो न चास्योत्पादवैयर्थ्यमिति । एवमपि यदि ॥

अजातो जात इत्येवं जायमानः कुतः किल ।

यद्यजात एव जायमानः पदार्थो जन्माभिमुख्यात् परेण जात इति कल्पितः । जाताजातयोः

भेदाभावात् घटाभावः तदा किं न विकल्प्यते ॥ 346.

जातावस्थ एव हि पदार्थो घट इत्यभिधीयते । जाताजातयोश्चैक्यात् प्रागभावेन जातोऽपि घटो अभा[६]व एवेति स्यात् न चैतत् सम्भवतीत्ययुक्तमेतत् । अथापि स्यात् । नैव जायमानाजातयोर्भेदाभावः । उत्पत्तिक्रिययाविश्यमानो हि पदार्थो जायमान इत्युच्यते । स च ॥

---

[1] [Leaf 33 of the MS.]

अनिष्पन्नोऽप्यजातात्तु जायमानो बहिष्कृतः । 347.

यद्यप्यनागतात् अनिष्पन्नरूपोऽपि पदार्थो जायमानो बहिर्व्यवस्थापितः ।

तथापि जायते जातो यतो जाताद्बहिष्कृतः ॥

य[७]था अजाताज्जायमानो बहिष्कृतः क्रियावेगात् एवं जातादपि बहिष्कृत एवानिष्पन्नरूपत्वात् ततश्चाजात एव जायत इत्यापन्नमिति नास्ति जायमानं नाम। न च केवलं जाताद्बहिर्भूतत्वादजात एव जायते। इतश्चाजात एव जायते। यस्मात् परस्य ॥

नासीत् प्राग्जायमानोऽपि पश्चाच्च किल विद्यते । 348.

तेनापि जायतेऽजातः आसीच्छब्दश्चिरानुक्रान्ताभिधायी नासीन्नाभूदि[८]त्यर्थः। योऽसाविदानीं जायमानत्वेन व्यपदिश्यते स नासीत् प्राक्शब्दस्त्ववधिवचनः। वर्त्तमानावस्थायाः प्रागतीते काले स जायमानोऽर्थोऽविद्यमानोऽपि पश्चात् किल जायमानो भवति। अतोऽप्यजात एव जायमानो भवति जनिक्रियावेगकाले। ततश्चाश्चाजातत्वेनाभूतत्वं न चाभूतस्यात्मलब्धात्मभावस्य निराश्रया जनिक्रिया प्रवर्त्तितुमुत्सहते। इत्याह ॥

नाभूतो नाम जायत इति ॥ [२२क]

अपि च ॥

जायतेऽस्तीति निष्पन्नो नास्तीत्यकृत उच्यते ।

अस्तीत्यनेन निष्पन्न उच्यते, निष्पन्न एव हि पदार्थोऽस्तीति। जायतेऽस्तीति भवतीत्यर्थः। नास्तीत्यनेनाप्यकृतोऽनिष्पन्न उच्यते। तदेतदवस्थाद्वयं विरहय्य।

जायमानो यदा भावस्तदा को नाम स स्मृतः । 349.

इत्ययं पदार्थो भवतीति जायमानावस्थो भावो यदा न शक्यते व्यपदेष्टुं तदासावनिर्द्धार्य्यमाणस्वरूपत्वादसन्नेवेति युक्तमवसातुम्। तदेवं यथोपवर्णितेनवि[२]चारेण जायमानस्यासम्भवात्।

कारणव्यतिरेकेण यदा कार्य्यं न विद्यते ।

प्रवृत्तिश्च निवृत्तिश्च तदा नैवोपपद्यते ॥ 350.

यदा कारणात् पृथग्भूतं कार्य्यं विचार्य्यमाणं न सम्भवति। तदा निराश्रया प्रवृत्तिः कार्य्यस्योत्पादो निवृत्तिश्च कारणस्य विनाशश्च न विद्यते। तदेवं परीक्ष्यमाणा भावा स्वभावसिद्धा न भवन्तीति हेवं मायोपमता गत्वावशिष्यते भावानाम्। तदेनां बालालापिनीं मायां व्यामूढजनसम्मो[३]हनीं अमूढजनविस्मयकरीं अवेत्य विधूयेदंसत्याभिनिवेशसमुत्थां पदार्थतृष्णां सकलजगदनुग्रहाय महाकरुणाबोधिचित्तादयज्ञानचयं अनुत्तरज्ञानोदयबीजभूतमभिमुखीकृत्य यथावदवसितसंसारस्वभावः क्लेशदुःखाग्निज्वालावलीढभुवनत्रयागारमध्यगतमत्राणं जगदीक्षमाणः पिण्डीकृताशेषजगद्व्यसनसम्पातैः क्षणे क्षणेऽन्यथा वान्यथा वा [४] संसारमपि कायचेतसोरुपनिपतद्भिरप्यकातरो युगपत्पिण्डीकृताशेषजगद्दुःखोपनिपातैरासंसारं समु-

त्माहितैकैकवीर्य्यचणः सकलस्य जगतः सर्व्वाकारज्ञताज्ञानरत्नधननिचयोदयकारणं विदुषो भवोत्पत्तिरित्य-वेत्य सर्व्वाकारज्ञताज्ञानोदयेन सकलस्य जगतः संविभागं चिकीर्षता पुनरपि युक्तं भवमुपात्तुमिति ।

## बोधिसत्त्व [५] योगाचारे चतुःशतके संस्कृतार्थप्रतिषेधो नाम पञ्चदशं प्रकरणम् ।

समनुक्रान्तैः पञ्चदशभिः प्रकरणैः शास्त्रकार्य्यं परिसमापय्य शास्त्रारम्भप्रयोजनं कृत्वान्यशेषपरिहारं चोपदर्शयन् षोड़शं प्रकरणमारभते ।

केन चिद्धेतुना शून्यमशून्यमिव दृश्यते ।
तस्य प्रकरणैः सर्व्वैः प्रतिषेधो विधीयते ॥ 351.

नानवधार्य्य यथा[६]र्थां शून्यतां कश्चिच्छक्तः संसारे सङ्गमवधूय निर्व्वाणस्पृहामुत्पादयितुम् ? स च शून्यतार्था जगतामतीवोत्रासकरत्वादप्रियावेदननिपुणपुरुषेण राज्ञः प्रियभार्य्यामरणक्रमावेदनसौमनस्योत्पादनवत् कयापि युक्त्या विदुषावतार्य्यः। अहङ्कारममकारस्नेहविपर्य्यस्तो हि लोकोऽनित्य एव वस्तुनि चणभङ्गदर्शनात् संस्कारमात्रप्रवाहस्य स[७]म्यगर्थानवसायात् शून्यतादर्शनविबन्धभूतां नित्यतामवधार्य्य प्रत्यवतिष्ठमाने जगत् अशून्यमेव प्रतिपन्नः। तदस्याशून्यताप्रतिषेधाय प्रथमप्रकरणप्रारम्भ इत्यादि योज्यम्। स्वभावविरहितार्थस्याच शून्यतार्थ इत्यसकृदावेदितम्। तदेवं केनचिद्धेतुना स्वभावरहितमपि वस्त्वेवाशून्यं येषां ख्याति तेषां तस्यासद्भावहेतोः सर्व्वैः पञ्चदशभिरपि प्रकरणैः प्रतिषेधो विधीयते। यद्येवमर्थमे[८]षां प्रकरणानामारम्भो नन्वतएवाशून्यत्वं सिद्धं भावानाम्। तथाह्येषां प्रकरणानां वक्ता तावत् भवानस्ति प्रकरण + + + + + हेतुव्यावर्त्तको हेतुरस्ति। वचनञ्चेदं प्रतिविशिष्टार्थकृतावधिध्वनिसमुदायरूपं पञ्चदशप्रकरणात्मकमस्तीति वक्तृवाच्यवचनानां सद्भावात् सिद्धमशून्यत्वं भावानामिति व्यर्थ एव भवतः सर्व्वप्रकरणप्रारम्भपरिश्रमायास इति प्रतिपादयन्नाह ।

यदा वक्तास्ति वाच्यञ्च न शून्य- 352. [२३]

creative commons

# Attribution-NonCommercial-ShareAlike 3.0 Unported

## You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

## Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

## With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer